CC-0. Digitized by eGangotri and MIDF- Delhi

पुत्रोपदेशः

संस्कृतखण्डः

दीक्षितः
तीर्थराज आचार्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुत्रोपदेशः

(संस्कृतखण्डः)

दीक्षितः
तीर्थराज आचार्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशिका – राजेश्वरी दीक्षिता आचार्यानी

संस्करणम् – प्रथमम् (संख्या – त्रिशतम्)

दिनाङ्कः – षष्ठ्युत्तरद्विसहस्रतमविक्रमशरदः
कार्तिकपूर्णिमा

मूल्यम् – ५४/– (चतुःपञ्चाशत् रुप्यकाणि)

मुद्रकः – ॐशिवशक्तिमुद्रणालयः
काष्ठमण्डपस्थः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रातःस्मरणीयानां मन्त्रविद्यागुरूणां
श्रीमतां कृष्णप्रसादशर्मणां
चरणकमलेषु

विद्याधनानां जनिमन्त्रदानां
निष्कामकामार्जितसद्धनानाम् ।
नत्वा पितॄणां चरणान् सुपूज्यान्
समर्पये तेभ्य इदं हृदब्जम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मदीया भावना

श्रीरामचन्द्रशर्मा पौडेलः (रंघाली)

नाऽविदितमेतत् खलु त्रितुङ्ग (तनहुँ) मण्डले प्राचीनकालादेव धौम्यवसिष्ठवादरायणव्यासप्रभृतयो बहव ऋषयो मनीषिणः समभूवन् । अस्मिँस्त्रितुङ्गमण्डले तदानीं सेनवंशजाः शास्त्रा-नुरागिणः संस्कृतप्रेमिणश्च राजान आसन् । तेषां सुसन्तुलिते सामञ्जस्यपूर्णे सुशासने त्रितुङ्गमण्डलमिदशिक्षासंस्कृति-सभ्यताविकासादिभिस्तुङ्गायितमासीदितीतिहासः ।

ततोऽर्वाचीनसमयेऽपि श्रीकृष्णाचार्यभानुभक्ताचार्यश्रीकृष्णपौडेल-भवानीशङ्करपौडेलधनञ्जयपौडेलादयोऽङ्गुल्यधिष्ठेया बहवो विद्वासश्चुँदीरंघाभूमिं समलङ्कृतवन्त आसन् । एतादृशी समादरणीया विद्वत् परम्पराऽऽसीत् । विशेषतो भानूदयतश्चतुर्दिक्षु प्रकाशिते ऽस्मिन्नेव मण्डले तन्हौ चूँदी रंघाग्रामे नेपालीभाषाया आदिकवेर्भानुभक्ताचार्यस्य षट्पितृवर्गे तृतीयपितृव्यस्य पद्मनाभस्य सन्ततौ वाराणस्यां समधीतविविधविद्यस्य नव्यन्यायाध्यायिनः श्रीकृष्णप्रसादा-चार्यस्य प्रथमपुत्ररत्नरूपेण सञ्जाताः श्रीमन्तो दीक्षिता-चार्यास्तीर्थराजशर्माणः । येषां कृतिरियं पुत्रोपदेशनाम्ना प्रकाश्यमानाऽस्ति ।

एतेषां माता शाम्भवीदेवी । या तन्हौ मान्हौ जनुषो भारद्वाजकुलावतंसस्य प्रसिद्धसिद्धमहापुरुषस्य देवीप्रसादशर्मणः पौत्री । या पुण्यप्रवाहेण प्रवहन्ती भागीरथीपवित्रजल-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रवाहप्लावितायां विश्वनाथपुर्यां काश्यां श्रीविश्वनाथानुग्रहादेवाऽऽहितगर्भा पतिव्रता सती शाम्भवी नवममासपर्यन्तं श्रीविश्वनाथचरणसेवा निरता । प्रारब्धे दशमे मासेऽतिकष्टेन, अतीवादर्शमये चुँदीरंघाग्रामे समागता विक्रममशरदः १९७४ तमे संवत्सरे चैत्रमासस्याष्टादशे दिवसे प्रासूतैनान् शिशुरूपान् । सिद्धेन प्रमातामहेन आलिङ्गिता लालिताश्चैते कर्मभक्तिज्ञानजनितकुलद्वयसुसंस्कारान् समादाय धरातले संजाताः । अतः एतेषां धर्मकार्ये सद्व्यवहारे चात्यन्तानुरक्तिर्जन्मत एव प्रारब्धेत्यनुमीयते ।

पिता श्रीकृष्णप्रसादाचार्यः सर्वकारीयशिक्षकवृत्तिमवलम्ब्य प्रथमं गोरखापाठशालायां पश्चाद् बन्दीपुरपाठशालायां प्रधानाध्यापकपदे नियुक्तः आसीत् । एते च पित्रा सह तत्र गत्वा प्राथमिकीं शिक्षां पितुः सकाशादेव प्राप्नुवन्तः । परमेकोनचत्वारिंशद्वर्षवयाः पिता स्वल्पे वयस्येव संसारलीलां समापयामास । एते ब्रह्मनिष्ठब्राह्मणकुलप्रसूता बटवः पटवोऽपि द्वादशहायने वयसि पितृविहीनतयाऽत्यन्तचिन्ताग्रस्ताः संजाताः । यौवने विधवया सन्तानत्रिकया जनन्या यथातथं पाठिता एते स्वकीयया चतुर्मुखप्रतिभया गम्भीरमेधया च यथावसरमायुर्वेदशास्त्रे धर्मशास्त्रे च प्रथमश्रेण्यां समुत्तीर्य आयुर्वेदरत्नधर्मशास्त्राचार्योपाधी च लब्धवन्तः । महेन्द्रविद्याभूषणपदकेनापि विभूषिताः सन्ति ।

संस्कृतव्याकरणमध्योत्तरणसमनन्तरं वर्षद्वयमायुर्वेदशास्त्रमधीत्यापि मध्ये विरम्य सन्ततेः पालनपोषणादिदायित्वं निर्वहन्त्या मातुः सहायार्थं गार्हस्थसंचालनार्थं च लमजुङ्गजीतापाठशालाया अध्यापकपदे सर्वकारतो नियुक्तिमासाद्य तत्रैव गत्वा पाठयन्त आसन् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जन्मजन्मान्तरेभ्यः सञ्चितैः प्रारब्धैस्तथाऽमुष्यैव जन्मनो घटनावलिभिश्च सुसंस्कृता एते स्वान्तः प्रेरिताः सन्तः स्वजन्मस्थलं ब्रह्मपुरं न केवलं नाम्ना अपितु कर्माऽऽचरणादिभिश्च सार्थकं कर्तुमनसो गृहव्यवहारसहायिकां सर्वकारप्रदत्तामपि तां वृत्तिं सन्त्यज्य परतन्त्राया अध्यापनवृत्तितो निवृत्ताः स्वतन्त्ररूपेण शिक्षाप्रचारं संस्कृतिसंवर्द्धनं समाजोन्नतिञ्चालक्ष्य स्वकीय एव ग्रामे स्वोपार्जितैरर्थैर्ग्रामीणजनानां सहयोगेन च पाठशालाभवनं निर्माय तत्रत्यान् गोचारणपरायणान् खेलननिरतान् ब्राह्मणबटून् समाहूय समानीय एकत्रीकृत्य १९९९ वैक्रमेऽब्दे वैशाखशुक्लाक्षयतृतीयायां मङ्गलाचारपूर्वकं स्वस्तिवाचनं कृत्वा वेदस्य वेदाङ्गानां चाध्यपनं प्रारभन्त ।

चतुःपञ्चानामेव विद्यार्थिनां समुपस्थितौ प्रारब्धैषा पाठशाला शतशः पिपठिषूँश्छात्रान् पाठयन्ती चेदानीं भानुसंस्कृत-माध्यमिकविद्यालयरूपेण सञ्चलन्ती वर्तते । तत्रेदानीं संस्कृतशास्त्रस्य पठनपाठनप्रभावादेव "भानुसंस्कृतविद्यापीठम्" संस्थापितं सम्यक् सञ्चालितञ्चास्ति ।

एते दीक्षितमाहाभागा बाल्यादेव स्वाध्यायशीलाः शिक्षानुरागिणो धर्मकर्मपरायणाः संस्कृतप्रेमिणः समाजमुद्दिधीर्षवोऽनुशासन-प्रियाश्चाभूवन् । स्वयमनुशासने वसन्तोऽन्येभ्योऽननुशासनं बोधयन्ति । स्वयमेव याथातथ्ये चरन्तः परानुपदिश्यन्ति । आजीवनमेव वेदवेदाङ्गप्रचारणमेतेषां महात्मनां नैसर्गिको व्यवसायः । यदा राजप्रासादे कार्यरतास्तदापि वेदवेदाङ्गप्रचाराय संलग्ना अभूवन् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमं स्वजन्मस्थले वेदवेदाङ्गपाठशालां सञ्चाल्य प्राप्तानुभवा एते काष्ठमण्डपेऽपि राज्ञोऽप्यनुमति–मादाय २०२२ वैक्रमाब्दे स्वनिवासस्थाने ठमेलग्रामे विधिवद्वेदवेदाङ्गविद्यालयं समुद्घाट्य सुचारु सञ्चालयामास । पश्चात् स्थानसाङ्कीर्ण्याद् विष्णुपदीनदीतटे गङ्गाघट्टे संचालयामासुः । सर्वकारेण माध्यमिकविद्यालयरूपेण स्वीकृतिश्च प्रदत्ता । स दशवर्षानन्तरं नवशिक्षाप्रादुर्भावेण विघटितः । तत्राधीयानाविद्यार्थिनो विभिन्नसेवानिरताः पौरोहित्यसञ्चालकाश्च वर्तन्ते ।

एवं संस्कृतिसंरक्षणाय सोदाहरणं कर्मकाण्डं प्रशिक्षयन्तो धर्मसंस्थापनार्थाय श्रौतस्मार्तयागानुष्ठानमाचरन्तो धर्मशास्त्राण्य–नुशीलयन्तो वर्तन्ते । परोपकरणञ्च स्वभाव एवैतेषाम् । वृद्धान्, शिशून्, दीनान्, हीनान्, अशक्तान्, पिपठिषून्, जिज्ञासून् मुमूर्षून्, तितीर्षूंश्च दृष्ट्वा श्रुत्वा वा उपगम्य यथाशक्तिवस्त्रैर्धनैरुपानद्भिश्छत्रैः पुस्तकैर्वा विविधै–रावश्यकवस्तुभिः पात्रानुसारेण तेषां सहयोगिनो भवन्त्येते महानुभावाः ।

अपथे पथिनिर्माणम्, कापथे सत्पथनिर्माणम्, अमन्दिरे मन्दिरनिर्माणम्, निर्द्रुमे वृक्षरोपणम्, निर्जले प्रपास्थापनम्, कूपोत्खननमादीनि परोपकृतिपराणि कर्माणि बहूनि बहुत्र कृतान्येतैः । स्थाने स्थाने विद्यालयस्थापनं वारं वारं लक्षहोम–करणम्,महारुद्रयागकरणम्, काष्ठमण्डपो पत्यकायां चतुर्दिक्षु यूपवत्स्थितेषु चन्द्रगिरिनागार्जुनगिरिमणिचूडगिरिशिवपुर्यादि–गिरिशृङ्गेषु तथा पशुपतिनाथपरिसरे रुद्रागारपीठे च वैदिकबटुशिष्यगणैःसह गत्वा यज्ञानुष्ठानसम्पादनम्, समये समये विद्वत्सभां समायोज्य विदुषामभिनन्दनमित्यादीनि सत्कार्याणि तत्रभवद्भिर्यथावसरे सम्पादितानि । जिज्ञासून्, शुश्रुषूँश्च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनानेकत्रीकृत्य धार्मिकी कथां स्वाङ्गणेऽन्यत्रापि कथयन्ति स्म । एवं भक्तजनगृहेषु मासिकरूपेण वार्षिकरूपेणासमाप्तिरूपेण च श्रीमद्भागवतस्य देवीभागवतस्य अध्यात्मरामायणस्य भगवद्गीतायाश्च पारायणपूर्वकं सुस्पष्टं सुबोधं च व्याख्यानं प्रकुर्वन्तो भक्तजनाननुरञ्जयन्ति च । सर्वेषु क्षेत्रेषु सर्वेषां कल्याणाय कृतोद्यमा एते षडशीतिवर्षवयस्का अपि चरेवैति चरेवैति इत्युपनिषद्घोषं यथावदनुसरन्तो हस्ते लेखनीं पुस्तकं वा गृह्णन्तो दरीदृश्यन्ते । एवं चतुस्त्रिंशद्वर्षपूर्वमारब्धं बहुकष्टसाध्यमग्निहोत्रव्रतं सायंप्रातर्हवनपूर्वकं दर्शपौर्णमासा-ग्रयणेष्टिसहितमद्यावधि यथावत् सञ्चालयन्तः सन्ति नित्यम् । तथा साग्निका एतेऽग्निनारायणप्रसादाच्छीतोष्णादिजन्यं कष्टं सोढुं च सक्षमाः सन्ति ।

प्रारब्धवशात् तत्र भवतां प्रथमा धर्मपत्नी विष्णुमायादेवी एकं पुत्रं पुत्रीमेकां च द्वे अपत्ये न्यासीकृत्य दिवंगता । तदनन्तरं समूढा द्वितीया धर्मपत्नीः राजेश्वरीदेवी आचार्याणी । सौभाग्यवशादग्निहोतृकुलोद्भवा मनोवृत्तानुसारिणीसहनशीला-सुशीलैषा साष्टापत्याऽपि वसुमतीव सर्वसहा सती तत्र भवतां सर्वकार्यसंपादने सहायिका विद्यते । योग्यं योग्याय दातव्यमित्याभाणकोऽत्रैव यथार्थतामुपेतः । रत्नकाञ्चनसंयोग-श्चात्रैव संजातः । नेपालराष्ट्रियसंस्कृतिप्रवर्द्धनकेन्द्रस्याऽऽ-योजनायां सपत्नीकैरेतैरशीतिवर्षे वयसि पाञ्चाहिकं चातुर्मास्य-यागं संपाद्य विश्वस्मिन्नेकस्मिन् हिन्दुधर्मावलम्बिनि नेपालाऽधिराज्येऽद्यावध्यननुष्ठितोऽग्निष्टोममहाक्रतुः सोमयागश्च संपादितः । यो हि यागो नेपालेऽभूतपूर्वत्वेनैतिहासिकः समभवन् । अत एते सोमयाजिनः सोमं कृत्वा दीक्षिताः सोमरसं पीत्वा अमृताश्चाभवन् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं श्रौतस्मार्तादियजनपूजनसेवनप्रशिक्षणादिक्रियाकलापेषु सदा रममाणा माहर्षीं दिनचर्यां चरन्तो वैदिकसनातनसंस्कृतिमयीं जीवनपद्धतिं समाश्रयन्तः संप्रति ज्ञानेश्वरीचरणे म्हैपीग्रामे निवसन्ति । अग्निहोत्रशाला च तत्रैव वर्तते सायं प्रातरग्निहोत्रं दर्शपौर्णमासाग्रयणेष्टीश्च तत्रैव संपादयन्ति ।

सापत्यदशका नीताष्टदशका गृहमेधिन एते बहिः कृत्रिमसंरम्भा अन्तः संन्यस्तसर्वाशाःसन्तो गृहमन्दिर एव रममाणाः प्रतीयन्ते । इच्छाज्ञानक्रियेति त्रिशक्तियुक्ता ऋषिकल्पा एते "कृण्वन्तो विश्वमार्यम्" इत्यौपनिषदीं वाचं सार्थयन्तोऽद्यापि धर्मशास्त्र-विषयेषु पृच्छकेभ्यो जिज्ञासुभ्यो वा यथाप्रश्नं निर्णयं समुपदिशन्ति ।

नैतावन्मात्रं भवतां व्यक्तित्वं कृतित्वं च । एते क्रान्तदर्शिनः कवयः कवितालेखने सिद्धहस्ताः निपुणाश्च सन्ति । प्रमाणमेतत्पुस्तकमेव पुरस्तात् । एतेषां लेखनी नेपालीभाषायां देववाण्याञ्च मुक्ताबिन्दून् क्षरन्ती समानरूपेण चलति । पथि हिण्डन्तो याने वसन्तः पत्राचारं कुर्वन्तोऽपि श्लोकं रचयन्ति । सामयिकीं परिस्थितिं व्यक्तेः प्रकृतिं विकृतिमनुकृतिञ्चावलम्ब्य वस्तुस्थितिं यथातथमुत्तारयन्तः कवितां कुर्वन्ति । नेपालीभाषाया आदिकवेर्भानुभक्तस्य कविशोरोमणेर्लेखनाथस्य च प्रभावो दृश्यते नेपाली कवितासु । सरलाः सरसाः बह्वर्था भावगम्भीराश्च भवन्ति कविताः । तथैव संस्कृतकवितासु कविकुलगुरोः कालिदासस्यौपम्ये भारवेरर्थगाम्भीर्ये लालित्ये साहित्ये च दण्डिनः प्रभावोऽस्तीत्युल्लेखनं नातिप्रसङ्गायते ।

विद्वच्छिरोमणेः कुलचन्द्रस्य जगद्गुरोराद्यशङ्करार्यस्य च पद्धतिमपि अनुसरन्ति । विवधेषु वार्णिकच्छन्दःसु पद्यानि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कवयन्ति तत्र भवन्तः । आशुकवयश्चैते । कवितासु रसाभिव्यञ्जनानुप्रासालंकारौपम्यगुणादीनि तत्र तत्र भवन्ति तत्र भवताम् । सर्वाणि पद्यानि श्रुतिमधुराणि पाठसरलानि मनोहराणि सन्ति ।

पाठकवर्गाः !

करतलसमुपस्थितं पुस्तकमेतत्स्वयमेव सम्यगधीत्य विदाङ्कुर्वन्तु । इति बद्धकरं प्रार्थये । बाल्यकालादेवाऽहं जानामि । तत्र भवता सर्वं चरित्रं पवित्रं सरलं सात्विकं परोपकृतिपरं सर्वानुकरणीयञ्चास्ति सच्चरित्रमेतेषाम् ।

व्यक्तित्वम् –

व्यक्तित्वं चोदाहरणीयमस्ति । चर्मास्थिमयं कृशतमं शरीरं धारयन्त एते महानुभावा मनसा बुद्ध्या सत्कर्मभिश्च विशालतमकाया वर्तन्ते । तत्र भवतां शैक्षिकः सांस्कृतिकः सामाजिको धार्मिकोऽध्यात्मिकः सर्वोऽपि पक्षः शर्करापिण्ड इव यतस्ततः सर्वतश्च मधुर एवास्तीत्यवधारणा मामिका । यद्यप्येते मम वेदगुरवः । एतैः शैशवादेवाहं लालितोऽनुपालितः पाठितोऽनुशासितस्तदपि पक्षधरोभूत्वा न मया प्रकटीकृतमिदमभिमतम् । भिन्नरुचिर्हि लोकः । अतः ममैतन्मत मननुमोदयन्तोऽपि भवेयुर्नाम । स्वातन्त्र्यं च तेषां ममेव । नानुरोधं च करोमि सम्मत्यर्थम् । परन्तु सत्यं सर्वथा सर्वदैव सत्यायत इति विश्वसिमि । पञ्चश्रीकाः सर्वकारा अपि विविधैः पदकैर्गोरखादक्षिणबाहुत्रिशिक्तपट्टाद्यलङ्कारैरेतान् सममानयन् । साहित्यादिप्रवर्द्धनपरा विविधाः संस्थादयश्चतुरस्र–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिभासमन्वितानामेतेषां गुणगणान् गणयन्तः एतान् समभ्यनन्दयन् ।

कृतित्वम् —

विशेषत एतेषां कवितासु त्रैविध्यात्मको भावः प्राप्यते । अतश्च व्यवहारपरकाः, नीतिमूलकाः, आध्यात्मिकपुरःसरा कविताश्च दृश्यन्ते । तेष्वपि भावेषु चाध्यात्मिकविषयः प्रधानो वर्तते । यथाहि सर्वासां नदनदीनां समुद्र एव पर्यवसानं भवति तथैव चैतासामपि कवितानां तात्पर्यमाध्यात्मिकभाव एव पर्यवस्यति ।

प्रकाश्यमानेऽस्मिन् पुस्तकेऽपि पुत्रोपदेशव्याजोक्त्या लिखितासु कवितासु त्रिविधं वर्गीकरणमनुभूयते । विभिन्ननिम्नशीर्षक–विषयविशेषाः कविता अधोभावविषयसंबद्धाः प्रतीयन्ते ।

(क) आध्यात्मिकभावे–

भवजलधिविमर्शः, रोग एव तपः, भगवतस्तवः, रामनाममहिमा, वाचं धेनुमुपासीत, तपस्या, द्विविधा शरणागतिः, बन्धनमुक्तिः, भागवतीयं नवनीतम्, इत्यादयः ।

(ख) व्यावहारिकपक्षे–

भयाभयविचारः, मातृमहत्ता, गार्हस्थ्यप्राशस्त्यम्,, बालवृद्धातुरसेवा, वृद्धावस्था, आतुरसेवा, छिन्नेमूले नैवशाखा न पत्रम्, कीर्तिः शरीरम्, आदर्शमयं वृक्षजीवनम्, प्रमादः, इत्यादयः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(ग) नैतिकपक्षे–

जननीमहत्त्वम्, मातृपितृसेवा, आपातनिपातनिरोधः, अहो अरण्यस्य महत्त्वमद्भूतम्, सदसच्चरित्रम्, विवेकः, मृताःश्वसन्तः, सज्जनदुर्जनस्वभावः, सावधानता, वृद्धसेवा, सतांसङ्गः सुखावहः, संयमः, इत्यादयः ।

एतास्वपि शब्दार्थालंकारमय्यो बह्व्यः सन्ति । अनुप्रासप्रसङ्गोऽपि बहुत्र प्राप्यते । क्वचिच्छेकानुप्रासः, क्वचिद् वृत्त्यनुप्रासः, क्वचिच्चाद्यन्तानुप्रासः, मध्यानुप्रासाऽन्त्यानुप्रासाश्च बहुविधाः प्राप्यन्ते ।

अन्त्यानुप्रासः "भगवतस्तवः" शीर्षके विलोक्यताम् मधुराधिप हे जनार्दन..........। मुनि गोचर हे वनेचर ....। तथैव औपम्येऽपि बहवः श्लोकाः संदृश्यन्ते । उपमेयोपमानबोधकशब्दसमानधर्मचतुष्टयैः पूर्णोपमा भवति । तच्च "द्विविधा शरणागति" शीर्षककवितायां विलोक्यते । उपमेये भगवच्छरणागतिः, उपमाने मार्जारी वानरीवृत्तिः, इत्थमिति सादृश्यबोधकः शब्दः, निर्जीववन्निश्चलत्वं सुखानुभवः, दुःखाभाव आदयः समानधर्माणश्च सन्ति ।अतस्तत्र पूर्णोपमा भवति । तथैव लुप्तोपमा, समानोपमाप्रशंसोपमादयोऽपि स्थाने स्थाने दृश्यन्ते । "भवजलधिविमर्शः"शीर्षककविताया–श्चतुर्दशश्लोकतः षोडशश्लोकपर्यन्तकास्त्रय एवश्लोका उपमानपरका वर्तन्ते । भावगाम्भीर्य विषयप्रसङ्गाद् बुध्यते । "बन्धनमुक्ति" शीर्षकविषयः पूर्णतः समग्रः पाठ एव भावगभीरः । "मृताः श्वसन्तः" इत्यपि कविताविषयस्य पूर्णपाठ एव भावगभीरः । "जननीमहत्त्वम्" इतिशीर्षककवितायाः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमश्लोके, "सज्जनदुर्जनस्वभावः" इति कवितायास्तृतीय-पञ्चमश्लोकयोर्भावगाम्भीर्यमतीवमर्मस्पर्शि वर्तते । पदलालित्यञ्च यत्र तत्र सर्वत्रैव विद्यते । क्वाचित्कस्यैवाऽङ्गुलिनिर्देशो भवति । तथापि "अहो अरण्यस्य महत्त्वमद्भुतम्", "कीर्तिः शरीरम्" "सदसच्चरित्रम्" कवितापाठे प्राशस्त्यं प्राप्यते ।

रसाभिव्यञ्जनमपि विशेषतः कवितायामुल्लेखनीयो गुण एव । "रसो वै सः"इत्यस्मात्कारणादपि चात्र भवन्तो रसान्नोपेक्षन्ते । अतः कविताया मञ्जरी रसमयी सरसा च भूत्वा विविधान् रसाँश्च निष्पादयति । वस्तुतः शान्तरसस्य निष्पत्तिर्बहुधो-पलभ्यते । श्रृङ्गारवीरकरुणाद्भुतहास्यभयानकबीभत्सरौद्रा अपि रसा यथास्थाने द्रवन्ति । कानिचिदुदाहरणानि पुरःस्थापितानि सन्ति । यथा–

(क) "आपातनिपातनिरोधशीर्षकस्य प्रथमः श्लोकः श्रृङ्गाररसोत्पादको वर्तते ।

(ख) "सदसच्चरित्रम्" शीर्षकस्य द्वितीयः श्लोको वीररसोनिष्पादकोऽस्ति ।

(ग) "मृताः श्वसन्तः" इति शीर्षकस्य तृतीयः श्लोकः करुणरसं उत्पादयति ।

(घ) "आदिकविर्वाल्मीकिः" इत्युपशीर्षकस्य पञ्चदशः श्लोकोऽद्भुतरसं भावयति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(ङ) "आदिकविर्भानुभक्तः" इत्युपशीर्षकस्य कविताया अष्टमः श्लोको हास्यरसमभिव्यञ्जयति ।

(च) "भयाभयविचारः" इत्यस्याष्टमः श्लोकोभयानकरस-स्योदोहरणं भवति ।

(छ) "वृद्धावस्था" इति शीर्षककवितायाः पञ्चदशः श्लोको रौद्ररसं क्षोभयते ।

(झ) "तपस्या" इति कवितायाः षष्ठश्लोकः शान्तरस-मुद्वेलयते ।

ये के च श्लोका अत्रोदाहृताः, त एव तदुदाहरणीया इति न मन्यन्ताम्, विस्तरभयादेवात्र संक्षेपीकृतं मयेति च मे विनयः पाठकमहोदयेषु । स्थालीपुलाकवद् भवतु पाठकमहोदयाना-मित्यवधारणा मामिकीति चाऽवधार्यताम् ।

मम त्वेते महापुरुषा निश्चप्रचं प्रातः स्मरणीयाः । वस्तुतस्तु न केवलं ममेतिमन्ये किन्तु एते दीक्षिताचार्यास्तीर्थराजेत्यन्वर्थ नामानः सर्वेषामेव प्रातः स्मरणीयाः सन्तीति । यतो हि तीर्थशब्दः, तरति मायादिकं यस्मादित्यर्थे तरणार्थकात् तृधातोः थक् प्रत्ययान्निष्पद्यते । अतः तारको गुरुः सेतुः मार्गः अध्यापकः पारप्रापयिताऽगमः, पवित्रं स्थलं जलम् इत्यादीनि तीर्थपदाभिधेयानि । अमरकोशेऽपि "निपानागमयोस्तीर्थमृषिजुष्टे जले गुरौ" इत्युक्त्वा तीर्थशब्दार्थः सुस्पष्टीकृतः । एतावता यस्य दर्शनं स्पर्शनं नमनं च पापादिकं विनाशति स तीर्थपदवाच्यः इति भावार्थः प्रकटीभवति । तदनुसारेणाऽपि सर्वेषामेते गुरवः प्रातःस्मरणीया भवन्ति सन्ति च सदैवेत्येष ममाभिप्रायः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतोऽन्त्ये चोत्तरोत्तरमुत्तरवयसि चलतामेतेषां सर्वतोगुरूणामपि गुरूणां चिरायुष्यं नैरुज्यं सौमाङ्गल्यं च श्रीष्टदेवचरणारविन्देषु संप्रार्थ्य गुरुभ्यो नमोवाकं च समर्प्य शुभाशीराशीन् कामयमानोऽहं विरमामि । उच्चावचेषु क्षमां च प्रार्थयामि । अस्तु शम् ॐ ।

श्रीतीर्थराजाः खलु तीर्थराजा माहर्षवृत्तं सुतरां चरन्ति ॥
सोमं प्रपीयाऽमृततामुपेता नामानुरूपा भुवनं पुनन्ति ॥१॥

सर्वे हि प्रारब्धविलासमाहुर्वेदान्तिनो भाव्यमिहास्ति किञ्चित् ॥
भवेत्कलाकौशलतोऽपि व्यक्तेः सुजीवनं श्रीगुरवः प्रमाणम् ॥२॥

अहं न वै वर्णयितुं समर्थो गुणान् गुरूणां सकलान् यथावत् ॥
परन्तु स्वाद्वीतमशर्करावत् यतस्ततः सर्वत एव सम्यक् ॥३॥

अपक्वमृत्पिण्डसमोऽहमासं यदा तदा मे गुरवोऽनुगृह्णन् ।
येषां सदाध्यापननैपुणानां प्रशिक्षणाज्ज्ञानपथानुगोऽस्मि ॥४॥

गुरून् सदा नौमि यदाशिषा मे यत्किञ्चिदज्ञानतमो निरस्तम् ।
संसारसिन्धौ सुनिमज्जितं मां ज्ञानप्रदानेन समुद्धरन्तु ॥५॥

अस्तु शम् ॐ

अक्षयतृतीया
२०६०
बालाजुः, उच्चैस्तलम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मदीयं किञ्चिद् वक्तव्यम्

मम दृष्टश्रुतपठितविषयेषु कविताकल्पने द्रढीयसी अभिरुचिरासीत् । अतः समये समये प्रासङ्गिकरूपेण रचितानि विभिन्नविषयबद्धानि पद्यानि बहुशः सञ्जातानि । परं तानि यत्र तत्र प्रकीर्णानि आसन् ।

प्रसङ्गवशात् कतिपयांशमपि शृण्वन्तः सज्जनाः सर्वाणि पद्यानि सङ्कलय्य एकत्रीकृत्य पुस्तकाकारेण प्रकाशनाय प्रोत्साहनं प्रदत्तवन्तः । मदीया भ्रातरः पुत्राश्च प्रोत्साहिताः सञ्जाताः । तत्कार्यसम्पादनाय सर्वे पुत्रा अग्रेसरा अभूवन् । तत्र मम षट्सु पुत्रेषु मया सहैव आसीनः पञ्चमः पुत्रो दिव्यचन्द्र आचार्यः अहोरात्रं परिश्राम्यन्सर्वाणि पद्यानि एकत्रीकृतवान् । तत्र कतिपय पद्यमालायां पुत्रोपदेशोऽधुना प्राकाश्यं नीतः । लघुकलेवरोऽपि ग्रन्थ एष बालमधुराऽस्फुटध्वनिरिव यदि सज्जनमनोविनोदाय कल्पेत तदा मदीयो हृदयसरोवरतोऽनायासप्रसूतो वाग्व्यूहश्चरितार्थो भवेदिति मन्येय ।

अत्र गुणाः सन्तिचेन्मधुमक्षिकेव तान् संगृह्य दोषान् मय्येव प्रत्यर्पयन्तु सारग्रहिणो विद्वांस इत्येव सविनयं निवेदयन् विरमामि ।

दीक्षितः
तीर्थराज आचार्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयानुक्रमणिका

विषयाः	पृष्ठाङ्काः
मङ्गलाचरणम्	क
भगवतस्तवः	१
रामनाममहिमा	५
सत्यमेव सर्वस्वम्	७
बन्धनमुक्तिः	८
भवजलधिमर्शः	१०
जननीमहत्त्वम्	१६
मातृपितृसेवा	१८
भयाभयविचारः	२०
रोग एव तपः	२३
असावधानता	२४
अहो अरण्यस्य महत्त्वमद्भुतम्	२५
त्रिधा जीवस्य कर्माणि	३०
वाचं धेनुमुपासीत	३१
तपस्या	३३
द्विविधा शरणागतिः	३७
सदसच्चरित्रम्	३९
मातृमहत्ता	४१
मृताः श्वसन्तः	४३
गार्हस्थ्यप्राशस्त्यम्	४४
सज्जनदुर्जनस्वभावः	४६
सावधानता	४८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गृहस्थधर्माः	५०
वृद्धसेवा	५१
छिन्ने मूले नैव शाखा न पत्रम्	५३
विवेकः	५५
शब्दार्थरहस्यम्	५६
सतां सङ्गः सुखावहः	५९
वाग्ज्योतिः	६१
बालवृद्धातुरसेवा	६६
वृद्धावस्था	६९
आतुरसेवा	७५
कालोपयोगः	७७
भागवतीयं नवनीतम्	८८
कीर्तिः शरीरम्	८०
आदिकविर्वाल्मिकिः	८०
गोस्वामी रामभक्तस्तुलसीदासः	८८
आदिकविर्भानुभक्तः	८९
संयमः	९५
प्रमादः	९६
आदर्शमयं वृक्षजीवनम्	९८
आपातनिपातनिरोधः	१००

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मङ्गलाचरणम्

ज्योतिर्ज्योतिरखण्डरूपमनिशं ब्रह्मात्मना संस्थितं
नित्यं कारणकारणं परतरं विश्वात्मना भासितम् ।
चिच्छक्त्या नितरामनन्यमहसा नित्यं समालिङ्गितं
ध्यायामि स्थिरशान्तशुद्धमनसा सत्यं शिवं सुन्दरम् ॥१॥

नागाननं नागविभूषणाढ्यम्,
एकेन दन्तेन सुशोभितास्यम् ।
सदाऽग्रपूज्यं जगदेकनाथं
विघ्नेश्वरं देववरं नमामि ॥२॥

रुद्रावतारः पवनात्मनन्दनः
श्रीरामपादार्पितसर्वजीवनः ।
वीरासनो वीरवरो वरप्रदो
बुद्धिं च सिद्धिं वितरेत् कपीश्वरः ॥३॥

पद्मासना सुस्मितसुन्दरास्या
सुराऽसुरैर्वन्दित पादपद्मा ।
सुश्वेतवर्णं वसनं वसाना
सरस्वती वाचमलंकरोतु ॥४॥

गणेश्वरो भाष्कर आदिशक्ति
र्नारायणः शङ्कर आदिदेवः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इमा हि पञ्चायनदेवता मे
संसिद्धये ताः प्रणमामि मूर्ध्ना ॥५॥

श्रीगार्हपत्यं त्वथ दक्षिणाग्निं
सुसिद्धिदं चाहवनीयवह्निम् ।
सभ्यावसथ्यावपि नित्यसेव्यौ
नमामि भक्त्या महतीं च वेदीम् ॥६॥

विभिन्नहेतोरपवित्रितानां
मलेन मूत्रेण च पावयन्तीम् ।
सर्वस्वसवार्थ हिताश्च शक्त्या
तां होमधेनुं प्रणमामि नित्यम् ।७॥

शरीरसंस्पर्शपवित्रितेन
वातेन रोगादिहरेण नित्यम् ।
हुङ्कारघोषेण च पावयन्तीं
तां होमधेनुं हृदि धारयामि ॥८॥

घृतेन दध्ना पयसा च शश्वद्
देवाँश्च पितृनपि तर्पयन्तीम् ।
तथा मनुष्यातिथितृप्तिहेतुं
तां होमधेनुं शिरसा नमामि ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सोमेन यागेन महाम्महिम्ना
यज्ञेशदेवं विधिनैव यष्टुः ।
सान्नाय्यदर्शेष्टिसमृद्धिदायाः
श्रीसोमधेनोस्चरणान्नमामि ॥१०॥

ते यज्ञविज्ञा द्विजधर्मनिष्ठाः
संप्राप्त-संमान्यतम-प्रतिष्ठाः ।
घनान्तवेदाध्ययननान्महिष्ठाः
पुनन्तु मां ब्रह्मविदां वरिष्ठाः ॥११॥

मूर्धद्वये शृङ्गचतुष्टयेन
सुशोभितं हस्तकसप्तकेन ।
सर्वत्र यान्तं चरणत्रयेण
नमामि नारायणमग्निदेवम् ॥१२॥

सुरम्यबन्धत्रितयाभिरामं
समस्तमर्त्यैरभिवन्द्यमानम् ।
जातादिकर्मस्वपि पूर्वमीड्यं
नमामि सर्वेष्टदमग्निदेवम् ॥१३॥

समस्तनिजकर्मणां नियतसेवनात्सन्ततं
पवित्रतमतां गतं परहितार्थकर्मोज्ज्वलम् ।
नितान्तविमले कुले जननतो भृशं निर्मलं
वसेद् हृदयमन्दिरे गुरुपितुः पदाब्जद्वयम् ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदैव सकलापदां स्मरणमात्रतो नाशिनी
प्रतिक्षणमहर्निशं मनसि मे समुद्भासिनी ।
समस्तदुरितक्षयं विदधती सुपद्मप्रभे
स्मरामि जननी पदे निरवधिप्रशान्तिप्रदे ॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भगवतस्तवः

अयि ! कृष्ण ! दयानिधे ! विभो !
हृदयाऽऽवास ! निरञ्जन ! प्रभो !
शरणागतदीनवत्सल !
जय ! सर्वेश्वर ! गोपबालक ! ॥१॥

मुरलीधर ! गोपिकासुत !
प्रियविप्र ! प्रियगोपिकाप्रिय ! ।
जय ! सर्वजनानुरञ्जन !
जय ! योगेश्वर ! दुःखभञ्जन ! ॥२॥

अनुरञ्जितगोपिकाजन !
सदयाऽऽलोकितसर्वसज्जन ! ।
दधिचौर्यविलोललोचन !
जय! लीलानवनीतभोजन ! ॥३॥

मथुराधिप ! हे ! जनार्दन !
प्रियवृन्दावन ! नन्दनन्दन ! ।
दशनद्वयसुस्मिताानन !
जय ! विश्वप्रियबालजीवन ! ॥४॥

अतिसुन्दर ! वेषभूषण !
हृदयाऽऽकर्षकबालखेलन ! ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जय ! भक्तजनार्तिनाशन !
धृतगोवर्धन ! चारुभाषण ! ॥५॥

मुनिगोचर ! हे ! वनेचर !
जय ! रासेश्वर ! नर्तकेश्वर ! ।
हृदयेश्वर ! राधिकेश्वर !
जय ! विश्वम्भर ! गोकुलेश्वर ! ॥६॥

वदनाऽमृतदुग्धदोहन !
जय ! वंशीस्वनविश्वमोहन ! ।
जय ! गोपचरित्रचित्रण !
नरलोकोत्तर ! दिव्यलक्षण ! ॥७॥

भवकण्टककंसमर्दन !
कृतमातापितृपादवन्दन ! ।
स्वपुरस्कृतसर्वसाधन !
विहिताऽऽत्मीयसुबन्धुरक्षण ! ॥८॥

जय ! राम ! रमापते ! विभो !
जय ! सीताप्रिय ! राघव ! प्रभो ! ।
जय ! मारुतनन्दनप्रिय !
जय ! सुग्रीवसुहृत्सतांप्रिय ! ॥९॥

शबरीप्रियभक्तवत्सल !
बदरीभक्षण ! हृष्टमानस ! ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जय ! दण्डककाननप्रिय !
जय ! सत्यव्रत ! नित्यनिर्मल ! ॥१०॥

भवसागरपारतारक !
जय ! नाम ! स्मरणाद्गतिप्रद ! ।
जय ! भक्तविभीषणप्रिय !
जय ! रक्षोऽधमरावणान्तक ! ॥११॥

कथमल्पधियं नमन्यसे
कथमायां भवदन्तिके विभो ! ।
भवतः करुणां विना प्रभो !
न किमप्यस्ति मदीयसाधनम् ॥१२॥

विमलौ चरणौ सदा स्मरन्
निभृतं स्थानमुपेत्य निर्वृतः ।
अमृतद्रवतृप्तमानसो
विरमेयं भवसागरात् कदा ॥१३॥

विषयस्मृतिरेव संसृति-
स्तव पादस्मरणं ध्रुवा स्मृतिः ।
कथमेकमना भजान्यहं
तमुपायं वद हे दयामय ! ॥१४॥

तव कोमलपादपङ्कजं
भवसंतारकचिह्नभूषितम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हृदये मम सुस्थिरं यदा
परमानन्दमवाप्नुयां तदा ॥१५॥

तव पादसरोरुहं सदा
मम पत्नी भजते निरालसा ।
विरता विषयान्मनस्विनी
रमते त्वच्चरणे तपस्विनी ॥१६॥

पुलकाञ्चितसर्वविग्रहा
परमानन्दरसेन संप्लुता ।
उपविश्य सुशान्तमन्दिरे
भजतेऽनन्यमनाः पदं तव ॥१७॥

चरणामृतपानलालसा
चरणध्यानपरायणा सदा ।
चरणं शरणं समाश्रिता
कुरुते ध्यानमतीव तन्मनाः ॥१८॥

अतिभक्तिमतीं सतीं च तां
परिपश्याऽऽशु दयार्द्रलोचनः ।
शरणागतदीनवत्सल !
कृपया पालय मां च सर्वदा ॥१९।

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रामनाम-महिमा

रेफाग्निसंज्ञ ! समदुष्कृतदारुसंघान्
सन्दह्य मां सुकृतिनं विदधातु देव ।
आभास्करो हृदि समुज्वलतां ददातु-
मश्चन्द्रमा दिशतु शान्तिकराऽवलम्बम् ॥१॥

अन्वर्थसंज्ञ ! रघुनन्दन ! राम! राम !
हे ! भक्तवत्सल ! विभो ! जय ! राम ! राम ! ।
नामान्यहर्निशमनन्यधिया भजन्तं
मां पाह्यनन्यशरणं शरण ! त्वमद्य ॥२॥

आबालवृद्धजनपीतयशः सुधाब्धेः
कल्लोलबिन्दुपरमाणुमवाप्य सद्यः ।
सञ्जातसन्मतिरपास्तसमस्तदोषः
सर्वाधिवारिधिमहं सुखतस्तरेयम् ॥३॥

रामनाम भजने मतिरेव
मास्मभूदिति वितर्कितमेव ।
तत्र बद्धकटिको न कोऽपि ना
स्यान्मतिः किमु समाधिना विना ॥४॥

हन्ताधुना विज्ञतमाजनाश्च
निश्चप्रचं खादतमोदतायाम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्यं रतारामभवद्दयां विना
पारेजगद्गच्छति कोऽधुना ह ! ॥५॥

अहर्निशं खादतमोदतायां
भृशं रतानामजितेन्द्रियाणाम् ।
कदिन्द्रयैश्चर्वितचर्वकाणां
शान्तिः कुतः स्यादसमीक्षाकाणाम् ॥६॥

अहो ! सदोत्तिष्ठतजाग्रतायां
भ्रमात्प्रमादाच्च बहिर्मुखानाम् ।
अहं ममाऽऽसक्तधियां जनानां
शान्तिः कुतः स्यात् विपरीतगानाम् ॥७॥

विचित्रशक्तेः प्रकृतेः प्रभावा-
ज्जगत्समग्रं गुणदोषपूर्णम् ।
दोषान् समुत्सृज्य गुणान् विचिन्वन्
गुणी भवेद् विज्ञजनः सुखी च ॥८॥

तृणं समुन्मूल्य सुरक्ष्य शस्यं
यथा समृद्धाः कृषका भवन्ति ।
तथैव विज्ञः परिहृत्य दोषान्
भवेत्सुधन्यः सुगुणान् विचिन्वन् ॥९॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्यमेव सर्वस्वम्

वयं निष्किञ्चनाः सत्यं मुनीनामनुयायिनः ।
अर्थोऽनर्थाय भवतीत्येवं प्रत्यक्षदर्शिनः ॥१॥

निष्किञ्चना हि मुनयो हरिर्निष्किञ्चनप्रियः ।
निष्किञ्चनाः सदा स्याम मुक्तसंसारवासनाः ॥२॥

सुखायैव हि सर्वेषां प्रवृत्तिर्दृश्यते ध्रुवम् ।
संसारवासनामुक्तं नैष्किञ्चल्यं परं सुखम् ॥३॥

भवतापाभितप्तानां शरणं किञ्चिदस्ति चेत् ।
सर्वश्रेयस्करं तत्त्वं सत्यमेव विराजते ॥४॥

नहि सत्यात् परोधर्मः सत्यं नित्यं हितं स्मृतम् ।
सत्येनैवात्मलाभः स्यात् सर्वस्वं सत्यमेव नः ॥५॥

अदीनाः स्याम शरदः शतं जीवेम पुण्यतः ।
आत्मतत्त्वावबोधेन सुखिनः स्यामः सर्वतः ॥६॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बन्धनमुक्तिः

मम ममेति वदत्यनिशं जन-
स्तव तवेति न किञ्चन जल्पति ।
मम ममेत्युदितं खलु वस्तु यत्-
सहगतं न च दृष्टिपथं गतम् ॥१॥

अपितु तत्सकलं भुवि तिष्ठति
न च विरौति न शोचति रोदिति ।
अपि रुदन्ति च दारसुतादिकाः
सह न यान्ति कदापि मृतेन ते ॥२॥

तदपि मोहपथानुगता जना
मम ममेति वदन्त्यनिशं वृथा ।
मम ममेति वदन्न हि मुच्यते
न च ममेति वदन् परिमुच्यते ॥३॥

तव ममेत्युदितं भुवि वस्तु यत्
प्रतिदिनं गलितं न च पश्यसि ।
किमिति जल्पसि मूढमते! मम
भज हरिं सकलोपरिगं धनम् ॥४॥

यदि हरिर्हृदि दीप्ततमो भवेद्
हरिमयं सकलं हि भविष्यति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदनु पश्यसि सर्वमिदं जगत्
सुखमयं परिपूर्णतमं सदा ॥५॥

प्रतिदिनं हृदयेन हरिं स्मरन्
कुरु च कार्यमकामहतः सदा ।
न हि गतिर्जलजस्य जलं विना
च तवापि गतिर्हरिणा विना ॥६॥

स्वमुखतो न ममेति वदत्यपि
हृदयतो न ममेति न वक्ति चेत् ।
न स विरक्त इति प्रतिभाव्यते
स तु विडम्बकरो हि विभाव्यते ॥७॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवजलधिविमर्शः

भवजलनिधिपारं गन्तुमिच्छाऽस्ति ते चेद्
अधिहरि कुरुभावं निर्मलं नित्यशुद्धम् ।
हरिचरणसरोजे वर्तते नित्यशान्तिः
सुजनहृदयलभ्या दुर्जनैर्दूरदृश्या ॥१॥

हरति सकलदुःखं हृद्गतं यो हरिः स
इति नियमनिरुक्तः सर्वथा सार्थनामा ।
हृदयकमलमध्ये तेजसा दीप्यमानः
स भवति यदि नित्यं ज्ञानभानुर्विभाति ॥२॥

भवजनधिसमत्वं प्रोच्यते ज्ञानदृष्ट्या
सततमननगम्यं पश्य तत्सूक्ष्मदृष्टया ।
भवजलनिधिरुक्तश्चित्तविक्षिप्तिरेषा
भवजलनिधिपारं ब्रह्मसंप्राप्तिरेव ॥३॥

धनजनभवमोहस्तोयराशिर्गभीरः
कपटकुटिलचित्ता धूर्तसंघा भ्रमाश्च ।
परजनपरदाराऽऽसक्तचित्ताः प्रमत्ता-
स्तरलतरतरङ्गाऽऽकारतामाश्रयन्ति ॥४॥

श्रृणु भवजलधेर्यन्मन्थनादौ च साम्यं
कुरु मननमिहाऽपि प्रज्ञया सूक्ष्मयैव ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यदि मननमहत्त्वं विश्वसेः सत्यमत्या
भवमथनसमुत्थं दिव्यतत्त्वं लभेथाः ॥५॥

अविरलफलदाता कामनापूर्तिकर्ता
सुरतरुरिह मान्यो वेदराशिर्वरेण्यः ।
श्रुतिमथनसमुत्था मोक्षलक्ष्मीर्हि लक्ष्मीः
सकलजनमनोघ्नी वारुणी मद्यजातिः ॥६॥

दिवि भुवि रममाणा मद्यपाश्चासुरास्ते
सुरवरवनितास्ता भोगरक्ता रमण्यः ।
जलजनिगरलं तच्छोषणं मोषणं यच्-
छमयति सकलं तद् यो नरः शङ्करः सः ॥७॥

अमृतममरतत्त्वं ब्रह्मविद्योपलभ्य-
मभयदमतिदाता यश्च धन्वन्तरिः सः ।
भवजलनिधितत्त्वं सूक्ष्मदृष्ट्या निरीक्ष्य
कुरु मननमिह त्वं सर्वदा दत्तचित्तः ॥८॥

अनुसर पदवीं तां या स्वपूर्वैः सुयातां
परिचिनु निजधर्मं सूक्ष्मया ज्ञानदृष्ट्या ।
अपसर भवसौख्यादन्ततो दुःखरूपाद्
भव परसुखभोक्ता मायिकान् प्रोज्झ्य भावान् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विविधविषयभोगो नैव संसारसारः
स्वभयमयपदाऽऽप्तिः सैव संसारसारः ।
मुनिवर इव मुक्तिं चाप्यतीत्य क्रमाख्यां
समरस इह "सद्योमुक्ति"मेवाप्नुहि त्वम् ।।१०।।

उरग इव च रज्जौ द्रष्टृताऽसौ विवर्तः
परिणतिरिह चोक्ता मृत्तिका भाण्डवद् या ।
उभयविधविवेकात् "खल्विदं ब्रह्म सर्वं"
स्मर च विमलबुद्ध्या "नेह नानास्ति" किञ्चित् ।।११।।

गगनमिव सुपूर्णामन्वये चातिरेके
ह्यतुलितचितिमेकां सर्वदा सर्वगां ताम् ।
अतिविमलधियाऽऽप्यां ज्ञानदृष्ट्या निरीक्ष्य
भव भवसुखशाली ज्ञानवान् नित्यतृप्तः ।।१२।।

सकलभुवनगं यद् वस्तुजातं स्वयञ्च
हरिमयमिति सर्वं भक्तिदृष्ट्याऽपि वीक्ष्य ।
हरिचरणसरोजे सर्वमेतत्समर्प्य
भव मृतिभयमुक्तो भक्तिमाँञ्छुद्धचेत्ताः ।।१३।।

अधिगतपरतत्त्वः फल्गुवस्तून्यपोह्य
परसुखमनुभुङ्क्ष्व ब्रह्मतत्त्वैकलक्ष्यः ।
श्रुतिविहितसुमार्गे वर्तमानोऽप्रमत्तो
जलकमलमिवास्मिँस्तिष्ठ निर्लिप्तचित्तः ।।१४।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहितहितविवेकं सूक्ष्मदृष्ट्या विधाय
सुखमनुभव नित्यं ब्रह्मणि स्वं निधाय ।
जनक इव विरक्तो रक्तवत्कर्म कुर्वन्
भवसुख इह जीवन्मुक्तिमाश्रित्य तिष्ठ ॥१५॥

दधिमथनसमुत्थं सारवत्सारभूत-
मनुभवपथनीतं ज्ञातसारैर्मनुष्यैः ।
रसमयनवनीतं यद्वदादेयतत्त्वं
तदुपमभवसारं विद्धि तद्ब्रह्मतत्त्वम् ॥१६॥

हरिचरणमहत्त्वं सन्तताऽभ्याससात्म्यं
कुरु हरिमयविश्वं पश्य सुस्वच्छदृष्ट्या ॥
विकसतु हृदिभक्तिर्ज्ञानवैराग्ययुक्ता
ह्यपसरतु समग्रश्चित्तदोषः स्वमोषः ॥१७॥

सकलभुवनसंस्थं वस्तुजातं विविच्य
भवजलधिसमत्वं स्वात्मनैवानुभूय ।
मननमयतुलायां तोलय त्वं स्व एव
परिचिनु भवसारं चेतसैवाऽन्तरेत्य ॥१८॥

नयविनयविवेकप्राप्तया कार्यसिद्ध्या
सुखमनुभव नित्यं पूर्णया त्यागवृत्त्या ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रुतिसरसरहस्यं चात्मसात्कृत्य धीरो
भव परहितचेता ज्ञानवान् कर्मवीरः ॥१९॥

जननमरणचक्रं विद्यया नाशमेतु
मनुजजननमेतत्सर्वथा सार्थमस्तु ।
हृदि सततमुदेतु ज्योतिरानन्दमूल-
मपनयतु च तत्ते मोहजालं समूलम् ॥२०॥

निजकुलविहितानां कर्मणां पालनेन
परधनपरदारप्रोज्झनात्संयमेन ।
अधिहरि दृढभक्त्या पितृवर्गाऽऽशिषा च
हृदयकमलमेयात्तत्त्वमेतन्निगूढम् ॥२१॥

वय इव गतिशीलं कर्म धर्मानुकूलं
परिचर विधिवत्तद् यच्चलोकद्वयेऽपि ।
हितकरमतिसूक्ष्मं दूरगामिप्रभावं
न हि विचल ततस्त्वं ब्रह्मतत्त्वं च पश्यन् ॥२२॥

अनुभवमनुलब्धं ज्ञानतत्त्वं मयाऽद्य
प्रकटितमिह संविन्मार्गसंदर्शनाय ।
सरलसरणिरेषा शीघ्रसंसिद्धिदात्री
ह्यनुसरति च योऽमूं ब्रह्मतत्त्वं स वेत्ति ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवसुखमिदमन्यद् बाह्यभोगाश्रयत्वा-
चछ्रवणजसुखमन्यद् बाह्यवृत्याश्रयत्वात् ।
मननजसुखमन्यच्चान्तरन्तः प्रवेशा-
दनुभवसुखमन्यद् ब्रह्मसंस्पर्शजं यत् ॥२४॥

प्रतिदिनमतिभक्त्या शुद्धया श्रद्धया च
मननमिदमधीते यः प्रशान्तः प्रदान्तः ।
करधृतवरमाला मालिनी सिद्धिलक्ष्मी-
र्वितरति चिरमस्मै पुण्यदां भोगलक्ष्मीम् ॥२५॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जननीमहत्त्वम्

मातुर्धौतं शिरसि सुदृढं वेष्टयित्वा सुभक्त्या
मोक्षं काङ्क्षन् नियमनिरतो भैक्ष्यवृत्यैव जीवन् ।
धावन् धावन् सकलपृथिवीं संपरिभ्रम्य तस्या
अर्चेत् पादौ तदपि तदृणान्नैव मुक्तः सुतः स्यात् ॥१॥

विनम्य भक्त्या चरणाभिवादाच्
शुश्रूषयाऽऽज्ञापरिपालनाच्च ।
भक्त्या तथाऽकृत्रिमया च मातुः
सिद्धिर्भवेद् भक्तिमतः सुतस्य ॥२॥

पत्नीं स्वकीयामनुशास्य शश्वत्
सेवारतां भक्तिमतीं विधाय ।
त्रुटिं च तस्याः परितः समीक्ष्य
विधाय सेवाऽभिरतां सुशीलाम् ॥३॥

पुत्राँस्तथान्यान् परिवारकाँश्च
सम्बोध्य सर्वाननुशास्य शश्वत् ।
कुर्याच्च मातुश्चरणेरताँस्तान्
श्रद्धावतो निश्छलभक्तियुक्तान् ॥४॥

एवं सदाऽऽराधनतत्परस्य
पुत्रस्य कर्तव्यपरायणस्य ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्णा समृद्धिर्विमला च बुद्धिः
स्यात् सर्वसिद्धिर्जननीप्रसादात् ॥५॥

रामस्य पन्थानमनुप्रसृत्य
सपत्नमाताऽपि च माननीया ।
यथा स्वमाता स्वपितुः स्वपत्नी
सा चापि तस्यैव तु धर्मपत्नी ॥६॥

एका सपत्नी सुतिनी यदिस्या-
दन्याः सपत्न्योऽपि ततः सुतिन्यः ।
अतश्च ता विज्ञसुतेन नित्यं
मातुः समत्वेन हि माननीयाः ॥७॥

जारंगताया अपि जन्मदाया
मातुर्मृतौ पङ्क्तिदिनं सुतस्य ॥
आशौचमुक्तं मुनिभिः स्वशास्त्रे
बोध्यं तु सर्वैर्जननीमहत्त्वम् ॥८॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातृपितृसेवा

मातापित्रोः सर्वदा श्रद्धयैव
कुर्वन् सेवां स्वेष्टलाभं करोति ।
मान्यावेतौ स्वेष्टदेवौ वरिष्ठौ
सेवातुष्टौ स्वेष्टदौ तौ भवेताम् ॥१॥

पुन्नाम्नो वै नारकात् त्रायते यो
व्युत्पत्त्याऽयं पुत्रशब्दो निरुक्तः ।
तस्मात् पुत्रैर्नारकत्राणहेतोः
पित्रोः कार्या भक्तिमास्थाय सेवा ॥२॥

कार्या पित्रोर्जीवतोर्वाक्यसेवा
स्वर्यातौ चेद् भूरिभोज्यात् क्षयाहे ।
एवं भक्त्या पिण्डदानाद् गयायां
त्रेधा सेवा शास्त्रसम्मानिताऽस्ति ॥३॥

शास्त्रं लोकं सम्यगालोच्य बुद्ध्या
पुत्रो मुक्तः स्याद् ऋणान्मुक्तिकामः ।
यो वै पुत्रोऽन्यप्रकाराञ्च सेवां
कुर्याद्भक्त्या पुत्रता सार्थयुक्स्यात् ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृत घ्नतां तुच्छतया विहाय
कृतज्ञतां स्वच्छतमां विधाय ।
पित्रोः सुसेवां नियमेन कृत्वा
सुपुत्रता बुद्धिमता सुरक्ष्या ॥५॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भयाभयविचारः

स्तेनाद् भयं तस्करकादिकेभ्यो
महाशठेभ्यश्च नृशंसकेभ्यः ।
जलप्रवाहाच्च हुताशनाच्च
भूपाद्भयं भूपजनाज्जनेभ्यः ॥१॥

पुत्रादिकेभ्यश्च भयं सुताभ्यो
दुष्टाच्चमित्राच्च प्रलोभकाच्च ।
भूकम्पविद्युत्प्रभृतिक्षयेभ्यो
भयं तथा राष्ट्रियविप्लवाच्च ॥२॥

द्यूताच्च पानाद् गणिकादिकाभ्यो
दानाच्च मानाच्च तथाऽवमानात् ।
स्नेहस्य भङ्गाच्च सुहृज्जनानां
दायस्य दाने च भयं सुतेभ्यः ॥३॥

परस्त्रियां गुप्तरतेः प्रसङ्गाद्
वाणिज्यहानेः कुमतेश्च सङ्गात् ।
जारान्वितताया निजदुष्टपत्न्या
भक्ताऽऽश्रितायाश्च तथैव तस्याः ॥४॥

एवं स्वकेभ्यश्च सुतादिकेभ्यो
विमार्गगेभ्यश्च कृतघ्नकेभ्यः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथोत्तरं वृद्धिमतो महर्घाद्
विवर्धमानादधिकव्ययाच्च ॥५॥

व्ययाधिके पर्वविशेषके च
ह्रासाद् भयं पूर्णधनस्य तस्य ।
धनस्य हेतोरपमृत्युकर्तु-
र्विषस्य दानाच्च तथैव पानात् ॥६॥

तथा भयं वै विधुरस्य पुंसः
स्वपुत्रवध्वा अपि दुष्टबुद्ध्या ।
कुलुञ्चकेभ्यश्च विलुम्पकेभ्यो
भ्रष्टाज्जनाद्धूर्तजनात्तथैव ॥७॥

एवं विधानेक दुरन्तचिन्ता
महाग्रहग्रस्तहृदन्तरस्य ।
उद्विग्नबुद्धेरजितेन्द्रियस्य
सदा भयं गुप्तधनस्य पुंस ॥८॥

यदृच्छया लब्धधनेन नित्यं
कर्तव्यबुद्ध्या निजकर्मकर्तुः ।
दातुश्च भोक्तुश्च पवित्रबुद्धे-
र्न वै भयं मुक्तधनस्य पुंसः ॥९॥

सन्तोषवृत्त्यामुदितस्य नित्यं
पवित्रबुद्ध्योज्झितसंग्रहस्य ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदा वदान्यस्य विशुद्धदृष्टे-
विमुक्तसङ्गस्य शमान्वितस्य ॥१०॥

कुटुम्बता यस्य समस्तभूमौ
क्रोधाच्च कामाच्च परस्थितस्य ।
नारायणायार्पितहृद्धनस्य
धनाद् भयं नैव कदापि तस्य ॥११॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रोग एव तपः

तदेव परमं तपस्तप्यते व्याहितेन यत् ।
लोकं जयेच्च परमं य एवं वेद तत्त्वतः ॥१॥

इति श्रुति प्रमाणेन व्याधिर्हि तप उच्यते ।
तपसा लभ्यते ज्ञानं तपसैव विमुच्यते ॥२॥

श्रीमद्भागवतेऽप्याह लक्ष्मीनारायणो हरिः ।
तपस्तपन्तं ब्रह्माणं सम्बोध्य करुणानिधिः ॥३॥

तपो मे हृदयं साक्षादात्माऽहं तपसोऽनघ ।
अतस्तपो हरिः साक्षाद् येन संप्राप्यते गतिः ॥४॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

असावधानता

मत्ताः प्रमत्ताः अविवेकवन्तः
सन्त्यत्र दुष्टा अपि चालकास्तैः ।
सञ्चाल्यमानानि विनाऽवरोधं
गच्छन्ति यानानि समुद्रवेगात् ॥१॥

तपश्चरन् सँसृतिवार्धिपारं
गच्छेन्मनुष्यस्तपसः प्रभावात् ।
तर्तुं न शक्योऽभवदत्र मार्गो
ह्यशिक्षयाचालकसम्प्रमादात् ॥२॥

तर्तुं न शक्ता युवका भवन्ति चेद्
वृद्धस्य बालातुरयोस्तु का कथा ।
निरर्थकं यत्र नृपानुशासनं
कथं भवेत्तत्र जनानुरञ्जनम् ॥३॥

स्थाने स्थाने मार्गसंतारणार्थं
कृष्णश्वेतैश्चिह्नितं स्थानमस्ति ।
तस्मिन् पान्थास्तर्तुकामा वसन्ति
कृत्वाऽनास्थां चालकाश्चालयन्ति ॥४॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहो अरण्यस्य महत्त्वमद्भुतम्

निधाय देहे परितः सुविस्तृते
चलाचलं सर्वमङ्करिष्णवे ।
अचिन्त्यशक्त्या सकलं सहिष्णवे
नमो नमोऽरण्यभुवे गुणात्मने ॥१॥

वसन्ति चैकत्र तपस्विनो जनाः
समित्कुशार्था अभियान्ति च द्विजाः ।
नृत्यन्ति गायन्ति मयूरकाः क्वचित्
कस्तूरिकागन्धमृगास्तथा क्वचित् ॥२॥

उत्प्लुत्य धावन्ति च वानराः क्वचित्
क्वचित् स्वतन्त्रा विहरन्ति वै नराः ।
क्वचिच्च गायन्ति मनोहरं स्वर-
मुदीरयन्तः किल कोकिला मुदा ॥३॥

क्वचिन्निजेच्छावशतो विहारिणो
मार्जारकाः फेरुकजम्बुकास्तथा ।
सदा स्वतन्त्रा विरहावहान् स्वना-
नुच्चारयन्तः परितो भ्रमन्ति च ॥४॥

क्वचित्सुरम्यैः सकलप्रबोधकैः
स्वनन्ति शब्दैर्वनकुक्कुटा मुदा ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्वचित्तु झिल्लीगणगुञ्जनानि च
वैराग्यदानि प्रसरन्ति सर्वतः ॥५॥

व्याधा नृशंसा विहरन्ति कुत्रचित्
सुनिर्घृणाश्चौरजनाश्च कुत्रचित् ।
व्याघ्रा मृगेन्द्रा भुजगाश्च कुत्रचिन्
नन्दन्ति गर्जन्ति च निःश्वसन्ति च ॥६॥

विशालवृक्षास्तरवः क्षुपाः क्वचि-
न्नानाविधा वल्लरिकास्तृणानि च ।
तपस्विवन्मौनरताः सुनिश्चला-
श्चकासते सर्वहितार्थजीवनाः ॥७॥

क्वचिच्च गम्भीरजला जलाशयाः
सुशोभनाः सन्ति परार्थनिर्मिताः ।
तत्र स्वतन्त्रा निवसन्ति मौनिनः
स्वानन्दतुष्टा बकसारसास्तथा ॥८॥

क्वचित्तु पुष्पाणि सुगन्धवन्ति च
तथैव दुर्गन्धयुतानि कुत्रचित् ।
क्वचिच्च वन्या महिषाश्चरन्ति चेत्
क्वचिद् वराहा भुवमुत्खनन्ति च ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कूजन्ति हृष्टाः शुकसारिकाः क्वचिद्
धावन्ति खड्गा गवयाश्च कुत्रचित् ।
प्रकम्पयन्तोऽथ भुवं वरूथशः
सबन्धुवर्गाः करिणस्तथा क्वचित् ॥१०॥

एवं विधानेकगुणैः सुपूजितं
सर्वस्य सर्वत्र सदाऽनुरञ्जकम् ।
सहिष्णुताया अतुलं निदर्शनम्,
अहो ! अरण्यस्य महत्त्वमद्भुतम् ॥११॥

परस्परं नित्यविरोधकारिणां
स्वच्छन्दमाऽऽहारविहारशालिनाम् ।
अतिप्रसन्नेन हृदाऽतिभास्वता
समं समन्वय्य निवासदातृता ॥१२॥

रक्षिनृता स्वात्मरसैरनन्तकै-
राहारजातैरमृतोपमानकैः ।
अनेकतायाञ्च समत्वदर्शिता-
ह्यहो ! अरण्यस्य महत्त्वमद्भुतम् ॥१३॥

एनामरण्यभुवमेवगुरुं विभाव्य
सर्वानुकूल्यमथ सर्वसहिष्णुताञ्च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वीकृत्य कृत्यपदवीमनुसंसरन्तः
सद्यस्कमुक्तिमनुभूय सुखं तरन्ति ॥१४॥

अरण्यमेतन्नृशरीरमेव
यद्वा विशालं जगदेतदेव ।
सर्वं तदेतत् सुघटय्य विद्वान्
हृदैव कुर्यान्मननं सदैव ॥१५॥

मनुष्यदेहेऽपि भवन्ति नित्यं
सर्वे महारण्यभवाः पदार्थाः ।
आवर्त्य बुद्धिं मन इन्द्रियाणि
विलोक्यमस्मिन्नतिसूक्ष्मदृष्टचा ॥१६॥

क्रोधोऽथ तज्जाश्च मृगेन्द्रसर्पा
रागादयो वै मृगकोकिलाश्च ।
शमादयो ध्यानरतामहान्तो
जलाशयाः शुद्धमनः प्रवाहाः ॥१७॥

वृथैव निःसारितवाक्प्रवाहा-
स्तुल्या हि झिल्लीगणनिः स्वनैस्ते ।
कृतानि पाठस्तुतिकीर्तनानि
ज्ञेयानि वै कोकिलकूजितानि ॥१८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यादि सर्वं घटते नृदेहे
विचार्य बुद्ध्याऽमलयैव नित्यम् ।
नृदेहमेनं सफलं विधाय
गन्तव्यमस्मात्सुकृतं निधाय ॥१९॥

तिरस्कृतस्यापि च सज्जनस्य
नाधो भवन्तीह गुणाः कदाचित् ।
ज्वालेव वह्नेरधरीकृतस्य
भवन्ति वै प्रत्युत चोर्ध्वगास्ते ॥२०॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिधा जीवस्य कर्माणि

प्रारब्धमागामि च सञ्चितञ्च
जीवस्य कर्माणि त्रिधा भवन्ति हि।
भोगार्थमस्मिञ्जनने प्रयोजितं
प्रारब्धकर्मेति बुधैर्निरूपितम् ॥१॥

आगामि तज्जन्मनि संभृतञ्च
व्यतीतजन्मार्जितकर्म सञ्चितम्।
सन्दीपिते ज्ञानमये हुताशने
सर्वाणि कर्माणि भवन्ति भस्मसात् ॥२॥

प्रारब्धकर्माणि तु न ज्वलन्ति हि
तेषां क्षयो भोगत एव जायते।
श्रुत्यर्थमेतद् हृदयेन भाविनः
प्रारब्धमश्नन्त्यपि तत्त्वदर्शिनः ॥३॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाचं धेनुमुपासीत

वाग्वै धेनुर्मानवोत्थानहेतुः
श्रद्धाभक्त्या तामुपासीत धीरः ।
ईशोत्पन्ना वेदवाणी वरिष्ठा
सैवाऽस्माकं वर्तते कामधेनुः ॥१॥

दुग्धैः पूर्णास्तत्स्तनाः सन्ति काम्या-
श्चत्वारो नः कामनाः पूरयन्ति ।
स्वाहाकारोऽथो स्वधाकारनामा
वौषट्कारो हन्तकारस्तथाऽन्यः ॥२॥

वौषट् स्वाहा द्वौस्तनौ देवतार्थौ
हन्ताऽऽख्योऽयं मानुषाणां सुतृप्त्यै ॥
पित्रर्थे वै तृप्तिहेतुः स्वधाह्व
आज्ञा श्रौती पालनीयैव सद्भिः ॥३॥

स्वाहाकारः स्मार्तयज्ञार्थदाता
श्रौताद् यज्ञात्कामदाता वषट् च ।
मानुष्याद् वै हन्तकारोऽर्थदाता
पित्र्यादिष्टः स्यात्स्वधाकारनामा ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाण्या धेनोर्वार्षभः प्राणवायु-
स्तेनैवोर्ध्वं प्रेरिताऽऽयाति वाणी ।
एवं तस्या वत्सरूपं मनश्च
वाग्वै ब्रूते मानसस्राविता‍ैव ॥५॥

श्रौतीं वाणीं कामधेनुं वरेण्यां
सर्वान् कामान् सेवनात्पूरयन्तीम् ॥
संसेव्यैनां सर्वदा श्रद्दधाना
धर्म्यान् भोगानिप्सितान् प्राप्नुवन्तु ॥६॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तपस्या

तपो विष्णोरात्माऽधनविरहितानां परधनं
महाशक्तिप्राप्त्यै कुरुत तनुजाः सात्त्विकतपः ।
न भोगैः शान्तिः स्यात् कथमपि कदापीति न मृषा
अतः सर्वैर्ज्ञेयं तप इव धनं नास्ति किमपि ॥१॥

तपस्तद्यत्कार्यं परिणतिसुखं दुःखबहुलं
सदा स्वच्छं हृद्यं भवति च यतः शान्तिरनिशम् ।
मनोवाक्कायौघैः कृतमपि तपोऽन्यच्च भवति
तपस्यायास्तस्या विवृतिरपि निर्दिश्यत इह ॥२॥

प्रसन्नत्वं नित्यं परमपरतत्त्वस्य मननं
मनोरोधो बुद्ध्या छलकपटराहित्यमपि यत् ।
सुखे दुःखे साम्यं निरवधि सुशान्तिश्च मनसि
समेषां जीवानामभयजननं मानसतपः ॥३॥

श्रुतीनामभ्यासोऽध्ययनजपनं पाठनमपि
पुराणानां पाठो विहितविधिना श्रावणमपि ।
अनुद्वेज्यं वाक्यं प्रियहितमुदारं स्थिरतरं
सदा सत्यं वाच्यं मधुरवचसा वाङ्मयतपः ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदैवाऽराध्यानां हरिहरमुखानां सुमनसां
तथा सम्मान्यानां द्विजवरवराणां सुमहताम् ।
गुरूणां पूज्यानामतिशयकृपाऽऽप्लावितहृदाम्
स्वशक्त्या शुश्रूषाऽपचितिरतिशुद्धेन मनसा ॥५॥

ऋजुत्वं सौशील्यं विनयपरिपूर्णं सुचरितं
शुचित्वं देहादेः परिमलजलस्नानविधिना ।
अहिंसा जीवानामवनमपि वीर्यस्य सततं
समस्तैः सच्छास्त्रैर्निगदितमिदं कायिकतपः ॥६॥

तथा रोगाऽऽक्रान्तस्थितिरपि तपस्या भवति सा
तपस्याऽवस्थायामिव भवति कष्टं रुजि यतः ।
परं रोगो रोगो न मम तप एवेति सततं
हृदा स्मर्तव्यं स्यात् परमसुखकाङ्क्षैर्नरवरैः ॥७॥

प्रमाणञ्चाऽत्राऽऽस्ते न च मम कपोलेन कलितं
य एवं वेदेति श्रुतिरभिमुखीभूय वदति ।
अतो रोगाऽऽक्रान्तैः चरणशरणैर्ज्ञाननिपुणै-
र्हरिं स्मृत्वा रोगं श्रवणमननं कार्यमनिशम् ॥८॥

श्रमं धर्मं सर्वं सधृति सहमानो हि कृषको
विकर्षन् स्वां भूमिं मलजलसुपूर्णां च कुरुते ।
ततो युक्ते काले बहुविधसुबीजानि वपति
सदा धावन् धावन् स्वसुतमिव शुश्रूषतितराम् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथा कीटादीनां निरसनविधानेन च पुन-
र्विधायैषां सेवामभित उपसङ्गम्य नियतः ।
तपःसिद्धं चान्त्ये ह्यमृतफलमश्नाति सुखदं
तपस्यैवैषा वै कृषककृतसौश्रम्यजनिता ॥१०॥

सुपूज्यान् मात्रादीनितरपरिवाराँश्च विसृजन्
गतो गेहाद् विद्याऽध्ययनरुचिरुत्साहितमनाः ।
अखादन् खादन् वा स्वगुरुपदशुश्रूषणपरः
स्वधीते श्रद्धावान् स्थिरमतिरतीवोच्चमनसा ॥११॥

तपः कुर्वन्नेवं गुरुवरसुसङ्गेन च पुनः
समग्रां सद्विद्यां सरलसरणीकृत्य स्वगुरोः ।
प्रसादान् संप्राप्य प्रथमतमविद्वान् भवति सः
तपस्यैवैषा वै सुजनतमविद्यार्थिविहिता ॥१२॥

प्रसूं स्वां सर्वस्वां पितरमपि पूज्यं च सहजान्
परित्यज्याऽन्यस्य स्वजनरहिते नूतनजने ।
गृहे गत्वाऽत्यन्तं नवनवजनान् स्वान् प्रकुरुते
सदाश्रद्धायुक्ता निजनिहितकार्याणि कुरुते ॥१३॥

सती नारी नित्यं स्वपतिवरिवस्यां प्रकुरुते
पतिं विष्णुं मत्वा शमयति नितान्तं निजमनः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पतिं श्वश्र्वा सार्धं श्वशुरमपि संसेव्य सभया
समर्प्य प्राणान् स्वाँस्तपति कुरुते धैर्यमतुलम् ॥१४॥

परीवारान् सर्वान् सुखयति च सौजन्यगुणत-
स्तथा बन्धूनाप्तान् मधुरवचसा तोषयति सा ।
महाकायक्लेशं सहजमपि विस्मृत्य सततं
दिनं नित्यं स्वच्छं गमयति सदा स्मेरवदना ॥१५॥

तथा सर्वं सोढ्वा जनयति सुतानात्मरसत-
स्तनूजांस्तान् सर्वान् परिचरति सर्वस्वसहना ।
तपस्यैषा नार्या विपुलसुखदा शान्तिपरमा
ययाऽन्त्ये वैकुण्ठे निजविहितपुण्येन वसति ॥१६॥

दिवं याते भर्तर्यपि विरहिणी रोदिति भृशं
ह्यलङ्कारान् सर्वान् विसृजति धृतान् बालसमयात् ।
परित्यज्याऽऽभोगान् स्थिरतरमनाः स्वेतवसना
सदा स्वच्छाऽऽचारा भजति च हरिं स्वं पतिमिव ॥१७॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्विविधा शरणागतिः

मार्जारी नवसूतिका शिशुमती जात्याः प्रकृत्या स्वया
स्थानेऽन्यत्र शिशून् निनीषति यदा स्वाऽस्येन गृह्णाति तान् ।
ते चाम्बावदने वसन्ति नितरां निर्जीववन्निश्चलाः
सा च प्रापयते सुतान्प्रियतमान् स्वेष्टे स्थले स्वेच्छया ॥१॥

गच्छन्ती नवसूतिका शिशुमती जात्या स्वया वानरी
पृष्टे तञ्च शिशुं जिघृक्षति यदा प्रेम्णा स चाऽऽरोहति ।
भूमौ गच्छति वा तरोस्तरुषु वा तत्र स्थितो मोदते
हस्ताभ्यां ग्रहणं शिशोरपि तदा यत्नस्त्विहाऽपेक्ष्यते ॥२॥

इत्थं वानरशावकस्य च तथा मार्जारशावस्य च
स्वीकार्या शरणागतिः प्रकृतिजा जात्योर्द्वयोर्दृश्यते ।
कर्तव्याऽन्यतराऽनयोर्भगवतः पूर्णां कृपामीप्सुभि-
र्मार्जारी शरणागतिः सुचरमा तत्रोत्तमा मन्यते ॥३॥

वैडालीं शरणागतिं श्रितवतो यद् यद् भवेदीश्वरात्
तत्सर्वं सुखमेव भाति सततं दुःखं न मन्येतराम् ।
तद्भक्त्यैव समस्तमोहकलिलान्मुक्तो भवेयं यदा
गच्छेयं निभृतं शरण्यचरणं स्वानन्दतृप्तस्तदा ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वेषां शरणागतिः सुसरणिः सर्वार्थसिद्धिप्रदा
यामाश्रित्य जना अनन्यमनसो दुःखाब्धिपारंगता ॥
युष्माभिश्च नितान्तनिर्मलधिया संवीक्ष्य सारं परं
स्वीकार्याः शरणागतिः सुफलदा नित्यं हि सर्वेश्वरे ॥५॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदसच्चरित्रम्

मन्दाऽऽक्रान्तामपि गतिमतीं स्वां मतिं कारयन्त
आत्मन्येवाऽनिशमभिमुखीकृत्य तां प्रेरयन्तः ।
निःसंकल्पा विहितविधिना नित्यकृत्यं चरन्तः
शान्तस्वान्ताः स्वसुखनिभृताः सन्ति सन्तः कियन्तः॥१॥

पातिव्रत्ये नियमनिरताः सच्चरित्राः सुशीला
धर्मप्राणा अमृतवचना गेहकृत्येऽतिशस्ताः ।
स्वेष्टान् बन्धून्निजपरिजनाँश्चापि सन्तोषयन्त्यो-
नारीकृत्ये निहितसुगुणाः सन्ति सत्यः कियत्यः ॥२॥

मिथ्याऽऽचाराः प्रवचनपरा न्यासिनो वेषवन्तो
रागद्वेषाऽनलहतधियः सर्वदा सम्भ्रमन्तः ।
माध्व्या वाण्या सुसरलजनानात्मसात् कारयन्तो
मुक्तंमन्या कुटिलहृदयाः सन्त्यसन्तः कियन्तः ॥३॥

भक्तां नारीं मधुरवचसा स्वात्मनीनां विधाय
शिष्यां कृत्वा कुटिलमनसा जप्यमन्त्रं च दत्त्वा ।
तस्यां गुप्तं कलुषविधिना पुत्रमुत्पादयन्तः
सिद्धाऽऽकाराः कलुषहृदयाः सन्त्यसन्तः कियन्तः ॥४॥

त्यक्त्वा पूर्वां सुचरितवतीं धर्मपत्नीं कुलीनां
निन्द्यां नारीं मधुरवचनामन्यदीयामधर्म्याम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कामासक्तां चपलहृदयां कन्यकां वा जघन्यां
स्वीयां कृत्वा स्वपथपतिता सन्त्यसन्तः कियन्तः ॥५॥

अग्रे पत्युर्मधुरवचसा साधुपत्नीभवन्त्यो
भर्तुः पृष्ठे चलितमनसो गुप्तमन्यं भजन्त्यः ।
भोगासक्ता नरकमतयो लोकधिक्कारदग्धा
भ्रष्टाचारा उभयपतिताः सन्त्यसत्यः कियत्यः ॥६॥

काश्चिन्नार्यः परवशतया स्वेच्छया वाऽपि काश्चिद्
वेश्यावृत्तिं दुरितबहुलां गर्हितामाश्रयन्ति ।
पश्चाद्रोगैर्व्यथिततनवो दुष्कृतिं स्वां स्मरन्त्यो
नार्याऽऽकारा वितथजनुषः सन्त्यसत्यः कियत्यः ॥७॥

आयं भर्तुर्धनमपि समं स्वात्मसात्कृत्य धृष्टा
भर्तारं तं निजपरवशं पङ्गुवत्कारयन्त्यः ।
स्वेच्छाऽऽचाराश्चटुलवचना ग्रामनेत्र्यो भवन्त्यः
सत्याकाराः कुटिलचरिताः सन्त्यसत्यः कियत्यः ॥८॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातृमहत्ता

चितिस्वरूपा सकलोपरिष्टात्
प्रकाशमाना महसा महिम्ना ।
स्वकीयशक्त्यैव मुहुर्मुहुर्या
निर्माति ब्रम्हाण्डचयानन्नतान् ॥१॥

सत्यं शिवं सुन्दरमादिनाम्ना
सम्भाष्यमाणस्य परात्परस्य ।
ब्रह्माख्यतत्त्वस्य निजस्वरूपा
सैवावबोध्याऽऽदिममातृजातिः ॥२॥

पृथ्वीं प्रसूतेऽथ जलं प्रसूते
तेजः प्रसूते पवनं प्रसूते ।
नभः प्रसूते प्रकृतिं प्रसूते
कालं प्रसूतेऽथ दिशश्च सूते ॥३॥

ब्रह्मादिकान् देवगणान् प्रसूते
तथाऽसुरान् भूतगणाँश्च सूते ।
ऋषीन् प्रसूतेऽथ मुनीन् प्रसूते
द्विजान् प्रसूतेऽन्यजनान् प्रसूत ॥४॥

सूते तथा तस्करबालिशांश्च
पशून् प्रसूते पतगाँश्च सूते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कीटान् प्रसूते मशकाँश्च सूते
विचित्रशक्त्या सकलं प्रसूते ॥५॥

अतस्तु मान्या खलु मातृजाति-
र्याऽकृत्रिमस्नेहरसैर्बिभर्ति ।
अन्या शरण्या अपि वा वदान्या
भवन्तु नार्यो न भवन्ति गण्याः ॥६॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मृताः श्वसन्तः

वृद्धां नितान्तशिथिलावयवां सुदीनां
वीक्ष्याऽपि मातरमतीव कृपारसार्द्राम् ।
कुर्वन्ति ये न मनसा वचसा च सेवां
ते वै मताः सुकृतिभिस्तु मृताः श्वसन्तः ॥१॥

मातुः समीक्ष्य वदनं भृशदीनदीनं
नायाति पुत्रहृदयेषु कदापि दैन्यम् ।
नो वा स्मरन्ति गुरुपङ्क्तिगरीयसीं तां
ते वै मताः सुकृतिभिस्तु मृताः श्वसन्तः ॥२॥

म्लानामनन्यशरणां शरणाऽऽश्रितां स्वां
पोष्यां सुपूज्यजननीं पुरुदुःखदग्धाम् ॥
पश्यन्ति नो कुतनया यमलोकपान्था-
स्ते वै मताः सुकृतिभिस्तु मृताः श्वसन्तः ॥३॥

गर्भेऽतिकष्टमनुभूय तथा प्रसूय
स्वात्मोत्थशुद्धपयसा वयसा विवर्ध्य ।
दात्रीं सुखस्य जननीं न च मानयन्ति
ते वै मताः सुकृतिभिस्तु मृताः श्वसन्तः॥४॥

स्युर्नामपूर्णविभवाः समधीतशास्त्रा
विद्वत्तया परमया च सदैवमान्याः ॥
दीनां स्वकीयजननीं यदि नार्चयन्ति
ते वै मताः सुकृतिभिस्तु मृताः श्वसन्तः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गार्हस्थ्यप्राशस्त्यम्

निजोऽयं परोऽयं त्वदीयं मदीयं
भवेद् भावनेत्थं सदा तुच्छबुद्धेः ।
परं शुद्धबुद्धेः समस्ता महीयं
कुटुम्बायते सर्वदा स्वच्छदृष्टेः ॥१॥

इयं भावना वर्धमाना यदि स्या-
त्तपोरूपतां याति निर्लिप्तबुद्धेः ।
क्रमाच्छुद्धदृष्टेरकामस्य पुंसः
समस्तं जगद्ब्रह्मरूपेण भाति ॥२॥

जनुर्मानुषं पुण्यपुञ्जेन लब्धं
जगद्वार्धिसन्तारणे पोतरूपम् ।
सदैवानुकलोनभस्वत्स्वरूपो
हरिर्वर्तते हृत्सरोजे सदैव ॥३॥

हरेर्नाम नित्यं सुरम्यं सुलभ्यं
रसाला स्ववश्या सदाऽऽस्ते रसज्ञा ।
द्रुतं सिद्धिदाता युगोऽयं कलिश्च
ततोऽप्यानुकूल्यं किमन्वेषणीयम् ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इदं सूक्ष्मदृष्ट्या निरीक्ष्य स्व एव
विदद्ध्यात्स्वकीयं समुत्तारणं स्वः ।
वयं याम सर्वे जगद्वार्धिपारं
न चेत्सर्वथा स्यादसह्या विनष्टिः ॥५॥

शरीरादिसर्वेषु चेन्नश्वरेषु
विरागो यदिस्यात्सदा ज्ञानपूर्णः ।
पराभक्तिरत्रोदियाच्चेत्तदानीं
गृहस्थाश्रमः सर्वदा मुक्तिदः स्यात् ॥६॥

न च ब्रह्मचर्यं न वा वानप्रस्थ्यं
न संन्यास एवं न संस्थाविशेषः ।
विमुक्त्यै भवेयुः कराले युगेऽस्मिन्-
नतः सर्वमान्यो गृहस्थाश्रमोऽयम् ॥७॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सज्जनदुर्जनस्वभावः

सततं सफलायते जनो
यदि पश्येन्निजदुर्गुणान्स्वयम् ।
निजदोषसमीक्षको जनो
यतते सद्गुणलब्धये मुहुः ॥१॥

यदि दोषमपि स्वकं हठाद्
गुणमापादयितुं चिकीर्षति ।
न स सिद्धिमवाप्स्यति क्वचित्
परिणामे स्वयमेव नङ्क्ष्यति ॥२॥

बाटिकामुपगतोऽपि सूकरो
नुर्मलं मृगयते न सत्फलम् ।
दुर्जनो यदि गतोऽपि सत्सभां
दोषमेव चिनुते न सद्गुणान् ॥३॥

विभ्रमेण सुखमित्यबोधतो
दुःखमेव चिनुते हि दुर्जनः ।
बोधितोऽपि न हिते प्रवर्तते
हन्त हन्त प्रकृतिर्बलीयसी ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मदन्यो वरेण्यो न कोऽप्यस्ति गण्यो
न भूतो न भावी न वा वर्तमानः।
न जानाति कोऽपीति यो वक्ति नित्य-
महंभावदुष्टः स वै स्यान्निकृष्टः ।।५।।

युगानां गतिं यो न जानाति विद्वान्
स वै दुःखमाप्नोति कालावमानात् ।
युगस्यैव धर्मान् समान् पालयेद् यः
सं वै मुक्तिमाप्नोत्यविद्वानपि स्यात् ।।६।।

युगानां तु धर्मा महर्षिप्रणीताः
सुशक्यास्तदा तज्जमर्त्यानुकूलाः ।
विचार्यैवमेव प्रयत्नेन सर्वै-
र्युगस्यैव धर्माः सदा पालनीयाः ।।७।।

न कदापि विषं सुखाकरं
प्रभवेत् प्रत्युत मृत्युकारकम् ।
इति धीरधिया विवेचयन्
निजदोषान् परितो विवेचयेत् ।।८।।

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सावधानता

पीत्वा प्रमाद मदिरां प्रत्यक्षं मद्यमेव च ।
विलुप्तस्मृतिकाः सर्वे पश्यन्तश्च विपर्ययम् ॥१॥

स्वां जातिं स्वं कुलं धर्मं प्रसूतिं देशमेव च ।
सर्वं विस्मृत्य भोगान्धा आसक्ताः अर्थकामयोः ॥२॥

पश्यन्तोऽपि न पश्यन्तः सदैव कूटवादिनः ।
विवेकरहिता प्रायो जना जाता अनेकशः ।३॥

विस्मृत्य धर्मं कल्याणमूलं कामार्थरक्षकम् ।
विपरीतदृशो मूढा नष्टा भोगैकलोलुपाः ॥४॥

हा हन्त सन्तो दुःखाब्धौमग्नाः कालविपर्ययात् ।
सदा व्याकुलिताः सन्ति धर्मरक्षैकजीवनाः ॥५॥

धर्मे तथैव व्यवहारकार्ये
परोपकारे च महोत्सवे च ।
मत्ताः प्रमत्ता न भवेत वत्सा
भवेत नित्यं विहितप्रकर्षाः ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सदैव मातापितरौ प्रपूज्य
वृद्धौ च तौ प्राणपणैः सुसेव्य ।
दानेन मानेन च जामिवर्गान्
पितॄन् स्वधाभिः खलु तर्पयेत ॥७॥

सम्पूज्य देवान् सकलान् स्वशक्त्या
तथैव पञ्चायतनान् विशेषात् ।
सदैव वेदाध्ययनं कुरुध्वं
स्मरेत वेदं खलु सर्वमूलम् ॥८॥

नित्यं च गायत्ररता भवेत
तत्त्वं ततोऽन्यन्न तु कल्पयेत ।
सुताँश्च सर्वान् सुपथा नयेत
स्वधर्मतत्त्वं हृदि दीपयेत ॥९॥

राज्यस्य हेतोरपि धर्मनिष्ठाः
कुलप्रसूता नहि विक्रियन्ते ।
स्वल्पस्य हेतोस्तु परार्थनिष्ठाः
स्वभाग्यनिष्ठाः किमु विक्रियेरन् ॥१०॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गृहस्थधर्माः

ब्राह्मीसत्ता श्रद्धयाऽऽसादनीया
मायाऽसत्ताऽभावतो भावनीया ।
वेदे निष्ठा प्राणतः स्थापनीया
धर्मेष्वास्था कर्मतो दर्शनीया ॥१॥

राष्ट्रे भक्तिः प्रेमतो वर्धनीया
राज्ञि श्रद्धा धर्मतो धारणीया ।
पित्रोः सेवा शक्तितः साधनीया
गोविप्राणामर्चना पालनीया ॥२॥

साध्वी भार्या सर्वदा रक्षणीया
दुष्टा नारी सर्वथा वर्जनीया ।
शुद्धा विद्या सर्वतोऽप्यर्जनीया
दुष्टा धर्मा दूरतो दूरणीयाः ॥३॥

पूर्वैरार्यैर्मानिता मानवीयाः
सत्या धर्माः शीर्षतो माननीया : ।
धर्म्यादर्थाज्जीविका साधनीया
गार्हस्थ्यस्थैर्मुक्तिरासादनीया ॥४॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वृद्धसेवा

वृद्धो देवो भवति हि नृणां सर्वदा सेवनीयो-
वृद्धादाशीर्भृशहितकरी सेवया प्रापणीया ।
वृद्धं नित्यं प्रणमति च यो श्रद्धया भक्तिनम्रः
स प्राप्नोति प्रचुरविभवं सन्मतिं कीर्तिमायुः ॥१॥

वृद्धावस्था कतमवयसो माननीया च पूज्या
स्यादेतस्मिन् निगदति मुनिर्याज्ञवल्क्योऽत्यशीतिः ।
वृद्धावस्था भवति नवतिस्तत् परस्ताच्छतान्ता
स्यादित्येतत्प्रवदति मनुः सर्वमान्यो वरेण्यः ॥२॥

अन्येत्वाहुः कलितसमयाः षष्टिवर्षोपरिष्टाच्
शक्त्याहीना शथिलकरणा वृद्धता स्याज्जनानाम् ।
स्मर्तव्याऽस्मिन् व्यथितमनसः षष्टिवर्षोत्तरस्य
गोकर्णोक्तेर्वनगतिमतेरात्मदेवस्य गाथा ॥३॥

पूर्वे वृद्धाः सरलहृदयाः षष्टिवर्षात् परा ये
आयुः प्रश्नेऽभिदधति च ते काशिकायानवेला
जातेत्युक्त्वाऽनुभवनिपुणा वार्धकं षष्टिवर्षा-
दूर्ध्वं प्राहुः सुविशदधियैवात्र कार्यो विवेकः ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वे वृद्धा गलितवयसो जातिभेदं विनैव
संरक्षत्वादितरमनुजैर्माननीया भवन्ति ।
तेषां विप्राः शमदमयुताः कर्मनिष्ठा वरिष्ठाः
स्वाचारास्तेऽखिलहितकराः पूजनीया विशेषात् ॥५॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

छिन्नेमूले नैव शाखा न पत्रम्

यद्वद्वृक्षः पत्रशाखाफलाढ्यो
नानाद्रव्यैः स्वीयदेहात्समुत्थैः ।
नैकाञ्जीवाँस्तोषयत्येव नित्यं
धन्यश्चासौ दानिनामग्रगण्यः ॥१॥

नित्यं सोढ्वा वर्षवाताऽऽतपादीन्
पीत्वा पादैः पावितं पेयमम्बु ।
पूर्णः सोऽयं सत्फलैः पत्रपुष्पै-
र्नाना जातीञ्जीवयत्येव जीवान् ॥२॥

कश्चिद् दुष्टोऽदूरदर्शी कृतघ्नो-
मूढो मर्त्यः कर्तयत्यस्य मूलम् ।
तद् दुष्कृत्याद् वञ्चिताः सर्वजीवाः
छिन्ने मूले नैव शाखा न पत्रम् ॥३॥

तद्वद्जीवः पापपुण्यप्रभावान्
मर्त्यो भूत्वा जीवलोकं समेति ।
प्रारब्धाऽऽप्तान्सर्वभोगान् भुनक्ति
पापाद् दुःखं पुण्यकृत्यात् सुखञ्च ॥४॥

भुक्त्वा भोगान् पुण्यपापप्रणुन्नान्
धन्यम्मन्यः स्वं सदा बाह्यतृप्तः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भोगे मुग्धः साक्षिणं नैव पश्य-
न्नज्ञो जीवो बध्यते मोहपाशैः ॥५॥

स्वत्वं मुञ्चन्नस्थिरं वस्तु गृह्णन्
सत्यं त्यक्त्वा वैपरीत्यं गतस्य ।
कामः क्रोधो लोभमोहौ मदश्च
संवर्धन्ते भोगलिप्सोर्नरस्य ॥६॥

भूमौ गेहे सेष्टमित्रादिकेषु
पत्न्यां पुत्रेवासनाभिर्ममत्वम् ।
पापैः पुण्यैः स्वर्जितं यच्च वस्तु
नष्टे देहे सर्वमेवाऽस्य नष्टम् ॥७॥

धर्मो मूलं वस्तुतो मानवानां
स्मृत्वा चैवं मामका धर्मकार्ये ।
भोगाँस्त्यक्त्वा प्राणवृत्त्या यतध्वं
छिन्ने मूले नैव शाखा न पत्रम् ॥८॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विवेकः

विरक्तो स्वत्तवत्तत्र नृलोके नरतां न्यसेत् ।
इत्युद्धवाय कृष्णेन दत्तां शिक्षामपिस्मरन् ॥१॥

धृतिक्षमे समाश्रित्य सर्वदैवाऽचलः स्थिरः ।
यदाऽऽपतति तत्सर्वं समादधितरामहम् ॥२॥

यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत सस्तेनो दण्डमर्हति ॥३॥

इति स्मार्तञ्च वचनं संस्मरन्धनसञ्चये ।
सर्वदा भीतभीतः सन् यापयन्नस्मि जीवनम् ॥४॥

ब्राह्मणस्य हि देहोऽयं क्षुद्रकामाय नेष्यते ।
कृच्छ्राय तपसे चैव प्रेत्यानन्तसुखाय च ॥५॥

इति भागवतीं वाणीं धारयन् हृदये सदा ।
कुर्वन्नस्मि यथाशक्ति मनोवाक्कायतस्तपः॥६॥

इदमादर्शमाश्रित्य तनया मम सर्वदा ।
स्वकर्तव्याद् विचलिता न भवेयुः कदाचन ॥७॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शब्दार्थरहस्यम्

वाक्यस्य सकलस्यैव चतुर्धाऽर्था भवन्ति हि ।
मननेन गभीरेण बोद्धव्याः शब्दवेदिभिः ॥१॥

प्रथमस्तत्र शब्दार्थो भावार्थस्तु द्वितीयकः ।
लक्ष्यार्थकस्तृतीयश्च चतुर्थस्तु परार्थकः ॥२॥

केचिद् रमन्ते शब्दार्थे भावार्थे कतिचित् तथा ।
विज्ञाः केचन लक्ष्यार्थे परार्थे केचिदेव हि ॥३॥

सामान्यार्थः शब्दबोध्यस्ततोऽन्तर्भावबोधकः ।
ततोऽप्यन्तर्लक्षितार्थः परार्थोऽत्यन्तिमो मतः ॥४॥

परार्थ एव युक्तानां प्राप्तव्यं तत्त्वमुच्यते ।
तत्तत्त्वमेव प्राप्तव्यं प्रबुद्धतममानवैः ॥५॥

तत्प्राप्तये युक्ततमैः सोपानक्रमयायिभिः ।
अविरामेण कर्तव्यो यत्नः सर्वसहिष्णुभिः ॥६॥

एवं भक्तिमतां नृणां भगवद्भावितात्मनाम् ।
शब्दानां भजनोक्तानां बोध्या अर्थास्त एव हि ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्ञानमार्गस्य पान्थानां शान्तिदान्तिक्षमावताम् ।
प्रबुद्धानामपि तथा बोध्या अर्थास्त एव हि ॥८॥

बोद्धव्या युवतीयूनामपि भोगरतात्मनाम् ।
त एवार्था वस्तुगताः शब्दानामर्थवेदिभिः ॥९॥

परार्थस्त्वत्र विषये भोग एवाऽवसीयते ।
अन्यत्र परमात्मैव परार्थेनाभिधीयते ॥१०॥

कलौ युगे जनाः प्रायो विण्मूत्रे क्रिमयो यथा ।
रमन्ते विषयेष्वेव प्रवृत्तौ निरता जनाः ॥११॥

रमन्ते भगवद्भक्तौ भक्ताः कतिपये जनाः ।
रमन्ते परमानन्दे ज्ञानिनः केचनैव हि ॥१२॥

नृणां विषयमुग्धानां ज्ञानिनामपि तादृशाः ।
अर्था भवन्ति शब्दानां पार्थक्यं भावगं खलु ॥१३॥

यूनां विषयिणां तद्वच्छब्दब्रह्मरतात्मनाम् ।
भावो बहिर्मुखो याति बाह्ये वस्तुनि सर्वदा ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्प्राप्तपरभक्तीनां तथा ब्रह्मविदामपि ।
भावो ह्यन्तर्मुखो भाति सत्यवस्तुनि निष्ठितः ॥१५॥

ज्ञातव्यं सर्वमेवैतदसंसक्तधिया बुधैः ।
हेयं विविच्य हातव्यं प्राप्तव्यं सत्यवस्तु यत् ॥१६॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सतां सङ्गः सुखावहः

निम्बखण्डोऽतितिक्तोऽपि सिताक्वाथेन भावितः ।
तिक्तत्वं स्वगुणं त्यक्त्वा भावनान्मधुरायते ॥१॥

इक्षुखण्डोऽतिमधुरो निम्बक्वाथेन भावितः ।
मिष्टत्वं स्वगुणं हित्वा तिक्तो भवति भावनात् ॥२॥

एवं दुर्जनसङ्गेन सज्जनो दुर्जनायते ।
दुर्जनोऽपि सतां सङ्गप्रभावात् सज्जनायते ॥३॥

व्याधोऽत्यन्तनृशंसोऽपि सप्तर्षीणां महात्मनाम् ।
क्षणिकेनापि सङ्गेन तीव्रवैराग्यमाप्तवान् ॥४॥

तेषामेव कृपालेशात् सर्वं त्यक्त्वा तपोऽकरोत् ।
पुनस्तत् कृपयैवैष वाल्मीकिर्मुनिराडभूत् ॥५॥

तथा परीक्षिद् राजर्षी राज्यसंसक्तमानसः ।
अकस्माद् ऋषिणा शप्तो गतः कर्तव्यमूढताम् ॥६॥

ततो विरज्य साम्राज्याद् हरिद्वारमुपागतः ।
प्राप्तवाञ्छुकदेवस्याऽवधूतस्य सुसङ्गतिम् ॥७॥

अनन्यगतिको राजाऽत्यन्तवैराग्यमाश्रितः ।
नित्यं भागवतं श्रुत्वा सप्ताहान्मुक्तिमाप्तवान् ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषये परमार्थे वा गृहिणां त्यागिनामपि ।
सर्वत्रैवोभयाऽऽकाङ्क्षा शीघ्रसिद्धिकरी मता ॥९॥

अतः सतां विषयिणां सत्सङ्गेच्छावतामपि ।
भवेद् यद्युभयाकाङ्क्षा तदा सिद्धिर्ध्रुवा मता ॥१०॥

यथा सूर्योदये ध्वान्तं कथं कुत्र विलीयते ।
न दृश्यते चर्मदृग्भिरदृश्यत्वेन मानवैः ॥११॥

ज्योतिष्मतां सतां सङ्गादज्ञानं मनसि स्थितम् ।
याति कुत्र कथं चेति व्यक्तं वक्तुं न शक्यते ॥१२॥

सत्सङ्गस्य प्रभावोऽयमवितर्क्यतमो मतः ।
न सामान्यधिया लक्ष्यः साश्चर्योऽतिविलक्षणः ॥१३॥

इति धीरधियाऽऽलोच्य स्वात्मोद्धार चिकीर्षया ।
सतां सङ्गः सदा कार्यो भगवत्सेवया सह ॥१४॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाग्ज्योतिः

वांग्देवी सर्वदाऽऽराध्या नृत्यन्ती वदनाम्बुजे ।
यां विना मनसो भावो बहिर्नैवाभिगच्छति ॥१॥

नमस्करोमि तां देवीं संसिद्ध्यै विहिताञ्जलिः ।
बुद्धिं देहि जगन्मातः सिद्धिं च परमां तथा ॥२॥

प्रवच्मि यस्य कस्यापि नरस्य वक्तुमिच्छतः ।
प्रकृतेर्नियमादेव शब्दनिष्क्रमणक्रमम् ॥३॥

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥४॥

मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।"
इति पाणिनिना प्रोक्तं निर्देशं शीर्ष्णि धारयन् ॥५॥

विशदीकर्तुमिच्छामि वाग्देव्याः सुप्रसादतः ।
वक्तुमिच्छा यदोदेति तदैवात्माऽतिशीघ्रतः ॥६॥

वेगेन मन आहन्ति मनश्चाहन्ति सत्वरम् ।
जठराग्निं स च प्राणवायुं प्रेरयते द्रुतम् ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ्रमन् वक्षःस्थले वायुर्नादं ध्वनयति स्वरम् ।
जिह्वामागत्य नादः स कण्ठताल्वादिसंश्रयात् ॥८॥

वैखरीवर्णरूपेण व्यक्तीभवति बाह्यतः ।
आर्षसंस्कृतसिद्धान्ताद् वर्णव्यक्तेरनुक्रमः ॥९॥

कण्ठताल्वादिभेदेन सुस्पष्टमभिगम्यते ।
वर्णानां कादिङान्तानां हकाराकारयोरपि ॥१०॥

तथा विसर्जनीयस्य जिह्वामूलीयकस्य च ।
कण्ठेनोच्चार्यमाणत्वात् कण्ठस्थानमितीर्यते ॥११॥

वर्णानाञ्चादिञान्तानां सेकारयशयोरपि ।
जिह्वया तालुघातेन प्रोच्चार्यत्वेन तालुकम् ॥१२॥

वर्णानां टादिणान्तानामृकार र-ष-संयुजाम् ।
जिह्वया मूर्ध्निसंयोगादुच्चार्यत्वेन मूर्धकम् ॥१३॥

अर्णानां तादिनान्तानां लृकार ल-स-संयुजाम् ।
जिह्वाया दन्तसंयोगाज्जन्यत्वेन च दन्तकम् ॥१४॥

वर्णानां पादिमान्तानामूपध्मानीयकस्य च ।
ओष्ठद्वितयसंयोगादुच्चार्यत्वेन चौष्ठकम् ॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कण्ठौष्ठमुत्क्रमोदौतो रेदैतोः कण्ठतालुकम् ।
वर्गपञ्चमवर्णानां ञ–म–ङ–ण–न–संज्ञिनाम् ॥१६॥

नासाऽऽस्योच्चार्यमाणानां नासिका स्थानमुच्यते ।
इत्थं विज्ञानविधया दिव्यदृग्भिर्मनीषिभिः ॥१७॥

प्रोक्तं व्याकरणं दिव्यं वाचां संशुद्धिकारकम् ।
येन धौता नृणां बुद्धिः सदा ज्योतिष्मती सती ॥१८॥

कुशाग्रवत् सर्वशास्त्रेष्वन्तरन्तः प्रधावति ।
वाचामुच्चारणे वायुः प्राधान्यमधिरोहति ॥१९॥

अग्नेस्तु जनको वायुः स च शोषणधर्मवान् ।
अग्नेस्तापेन वाणी च कोष्णा भवति भाषणे ॥२०॥

वायोः शोषणशक्त्या च तदाऽऽस्यं परिशुष्यति ।
एवं वाग्ज्योतिरेवेति प्रत्यक्षमनुभूयते ॥२१॥

अत्र स्कन्दपुराणोक्त दिशाशब्दोद्गमक्रमः ।
जिज्ञासूनां प्रबोधाय संक्षेपेण प्रकाशये ॥२३॥

मूलाधारस्थिता देवी चैतन्यमात्रविग्रहा ।
सर्वेषां चेतनाधारा परानाम्नाऽभिधीयते ॥२४॥

सैव जन्तोर्वक्तुमिच्छोर्नाभिस्थं मणिपूरकम् ।
आगता सूक्ष्मवाग्ज़्योतिः पश्यन्तीत्यभिधीयते ॥२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततोऽपि निःसृता सा वाक् सन्दीप्ता ज्योतिरात्मना ।
कण्ठे विशुद्धे चक्रे सा सम्प्राप्ता मध्यमोच्यते ॥२६॥

ततोऽपि निर्गता सा वाग् रसनायां समागता ।
कण्ठताल्वादिसम्बन्धान्नानारूपाऽभिजायते ॥२७॥

सा वैखरी वर्णरूपा सर्वैरुच्चार्यते सदा ।
सैव सर्वैः समाराध्या विद्यादेवी सरस्वती ॥२८॥

अमूर्तामपि तां देवीं शास्त्रोक्तविधिनोदिताम् ।
मूर्तिं तस्या विनिर्माय पूजां कुर्वन्ति सज्जनाः ॥२९॥

निर्गता ज्योतिषोमूलाद् वहन्ती ज्योतिषैव च ।
ज्योतिषोच्चार्यमाणत्वात् वाग्ज्योतिरभिधीयते ॥३०॥

किं ज्योतिस्ते श्रुतौ चैव प्रश्नोत्तरविमर्शतः ।
सन्त्यज्य रविचन्द्राग्नीन् वाग्ज्योतिरिति निश्चितम् ॥३१॥

वाचं धेनुमुपासीतेत्युद्घोष्य च श्रुतावपि ।
वाग्धेनोरतिवैशिष्ट्यं गीतं तात्त्विकरूपतः ॥३२॥

देवीभागतप्रोक्तां सरणिं श्रयता मया ।
संक्षेपतो ध्यानयोग उच्यते ज्ञानवृद्धये ॥३३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"प्रकाशमाना प्रथमे प्रयाणे
प्रतिप्रयाणेऽप्यमृतायमाना ।
अन्तः पदव्यामनुसञ्चरन्ती
मानन्दरूपामवलां प्रपद्ये"॥३४॥

मूलाधारस्थितां देवीं दीप्तां कुण्डलिनीं शिवाम् ।
कुण्डलीभूतसर्पाभां सार्धत्रिवलयान्विताम् ॥३५॥

शान्तिदान्तिमयमुखैः साधनैः सह साधकः ।
ध्यायन् कुण्डलिनीं शक्तिं परमानन्दमाप्नुयात् ॥३६॥

बोधिता ध्यान योगेन पूर्णज्योतिः पुरस्सरम् ।
सुषुम्णोर्ध्वमधश्चैषाऽवरोहाऽरोहणक्रमात् ॥३७॥

भ्रमत्यमृतधाराभिः सिञ्चन्त्यानन्दरूपिणी ।
तदा जीवस्तृप्ततम आनन्दाम्भसि मज्जति ॥३८॥

न जानाति पृथक्त्वं च जीवात्मपरमात्मनोः ।
एवं देव्या उपासायाः प्राशस्त्यं स्मरत स्वयम् ॥३९॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बालवृद्धाऽऽतुरसेवा

मनुष्यजीवनगतिं प्रपश्यद्भिर्महर्षिभिः ।
साहचर्येण सम्प्रोक्ता वृद्धबालाऽऽतुराजनाः ॥१॥

संरक्षकत्वं सेव्यत्वं न्यूनत्वं नियमेषु च ।
निर्दिष्टं सुविवेकेन वयोऽवस्थां च वीक्ष्य तैः ॥२॥

प्रथमं बाल्यविषये वक्तव्यमिह दृश्यते ।
स्वमन्तव्यसुबोधाय तच्च वच्मि प्रसङ्गतः ॥३॥

कौमारमापञ्चमाब्दं पौगण्डं दशमावधि ।
कैशोरमापञ्चदशात् यौवनं च ततः परम् ॥४॥

इत्थं कतिपयाऽचार्यैः सुखबोधस्य वाञ्छया ।
पञ्चवर्षविभागेन वयसः कल्पनं कृतम् ॥५॥

अत्र तु प्रागुपनयाद् बाल्यावस्था प्रकल्पिता ।
शिशुत्वं दशनोत्पत्तेः प्रागेव परिकल्पितम् ॥६॥

तच्च बाल्येऽन्तरगतं मन्यते परिभाषया ।
अतश्चोपनयात् पूर्वं बोद्धव्यं बालजीवनम् ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ प्रस्तूयते तेषां त्रयाणां सेवनादिकम् ।
सेवकानां तु तत्कार्यमत्यन्तं दुष्करं मतम् ॥८॥

तत्र बालोऽत्यशक्तत्वात् परपोष्यो विशेषतः ।
समर्थैरितरैरेव कर्तव्यं तस्य सेवनम् ॥९॥

अत्यन्तपरतन्त्रस्य जननीदुग्धजीविनः ।
सर्वकर्माऽसमर्थस्य तस्य सेवा सुदुष्करा ॥१०॥

तथापि माता तत्सेवां करोति स्नेहयन्त्रिता ।
तत्सेवाजनितं दुःखं सुखम्मन्याऽतिमायया ॥११॥

पिता तथा परिजना भवन्ति सहयोगिनः ।
न पारयन्ति ते कर्तुं तस्य सन्ततसेवनम् ॥१२॥

किन्तु मातैव सततं प्रतिक्षणमनन्यधीः ।
सहमानाऽत्यन्तदुःखं नित्यसेवां करोति सा ॥१३॥

भोजने शयने याने चोत्सर्गे मलमूत्रयोः ।
स्वयं कर्तुं न शक्नोति बलं भवति रोदनम् ॥१४॥

एतत् सर्व जनन्यैव कर्तव्यं सावधानतः ।
ज्ञात्वाऽवस्थां बुभुक्षायाः कर्तव्यं दुग्धपायनम् ॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समये भोजनं पानं निशायां शयनं तथा ।
नियतत्वेन नाप्नोति माता सर्वं सहाव्रता ॥१७॥

रक्षणे वर्द्धने दुःखं मातापित्रोः समं द्वयोः ।
अधिकं मन्त्रदानादि पाठनादि च सत्पितुः ॥१८॥

मातुस्तु धारणं गर्भे पोषणं भक्षिताद् रसात् ।
सूतिः कष्टेन जातस्य सेवनं पोषणं तथा ॥१९॥

विघ्नेभ्यो रक्षणं नित्यं मलमूत्रादिशोधनम् ।
एवमादीग्नि कष्टानि मातुः सन्त्यधिकानि वै ॥२०॥

समेषां प्रियाः सर्वबाला भवन्ति
विहारैरनेकैर्जनान्मोदयन्ति ।
न पुत्रो न पुत्री न चास्त्यत्र भेदो
ह्यवस्था प्रियाऽस्मिन् न व्यक्तेर्विशेषः ॥२१॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वृद्धाऽवस्था

ऐय्य अत्रैव तत्रैव ऐय्य ऐय्य समन्ततः ।
वृद्धावस्थातु सर्वेषां जायते व्याधिमन्दिरम् ॥१॥

पुत्रा जाता वधूपक्षा अहार्यप्रकृतेर्वशात् ।
अन्येषामेव सञ्जाताः पुत्र्यश्च परबन्धवः ॥२॥

पौत्राः प्रपौत्रवर्गास्तु दूरदूरेऽभवँस्ततः ।
अभूवन् सुतरां दूरे इष्टमित्राणि बान्धवाः ॥३॥

जीर्णत्वात् पतिता दन्ताः कपौलौ निम्नतां गतौ ।
अस्पष्टाऽजनि सद्वाणी ह्यबोध्या श्रोतृवर्गतः ॥४॥

अन्धस्येवाऽभवद् दृष्टिः श्रोतृशक्तिर्लयं गता ।
पङ्गुवच्चरणौ जातौ करौ शिथिलतां गतौ ॥५॥

जातं शरीरं कङ्कालं त्वगस्थिपरिशेषणात् ।
कम्पश्च जायते प्रायः स्नायुशैथिल्यकारणात् ॥६॥

मेदोऽभिवृद्धितः केषां स्फिक्स्तनोदरवर्धनात् ।
उत्थाने गमने श्वासेऽतिकष्टमुपजायते ॥७॥

वृद्धोऽत्यशक्तो निर्विण्णो ध्वान्तं पश्यति सर्वतः ।
गतं शोचति खिन्नात्माऽज्ञानी न भजते हरिम् ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्न्यादयः सर्वजनाः गच्छन्ति स्वस्वकर्मसु ।
एकलः शक्तिविकलो गृहे वसति दुःखितः ॥९॥

अशक्त्या रोदिति मुहुः समाह्वयति ताञ्जनान् ।
दूरस्था नैव शृण्वन्ति धिक् करोति स्वकं रुदन् ॥१०॥

अतोऽसमर्थवृद्धस्य स्वजनैर्बन्धुभिस्तथा ।
कार्यं प्राणपणेनापि सेवया धर्मरक्षणम् ॥११॥

आहारस्य विवेकस्तु कर्तव्यस्तस्य सेवने ।
सुदृष्टिश्च सदा देया गमने शयने तथा ॥१२॥

समये समये स्वल्पं लघु भोज्यं हितं भवेत् ।
वर्षीयसो न हितकृदेकधा बहुभोजनम् ॥१३॥

अतिसारश्च भवति गरिष्ठबहुभोजनात् ।
सर्वं विचारणीयं स्याद् वृद्धस्य सेवकैर्जनैः ॥१४॥

करोति शयने मूत्रं पुरीषं शक्त्यभावतः ।
मलेन लिप्यते देहोऽन्तिके त्वसति सेवके ॥१५॥

रोगाक्रान्तिश्च भवति कीटाणूनां प्रकोपतः ।
ततो विकारा विविधाश्चोत्पद्यन्ते ह्यनेकशः ॥१६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सावधानेन कर्तव्या वृद्धसेवा सुदुष्करा ।
मनुष्याणां शरीरेषु शुक्रान्ताः सप्तधातवः ॥१७॥

प्रकृतेर्नियमेनैव भवन्ति देहरक्षकाः ।
रसादिशुक्रपर्यन्ता धातवो देहरक्षकाः ॥१८॥

बार्धक्ये स्वत एवैते क्षीयन्ते प्रकृतेर्वशात् ।
ह्रासेन मुख्यतत्त्वानां दौर्बल्यं वर्धते क्रमात् ॥१९॥

दौर्बल्ये सति वृद्धस्य शरीरं शिथिलायते ।
न्यूनाधिक्यं च भवति रक्तसञ्चारणक्रमे ॥२०॥

ततो भ्रमो विसंज्ञत्वं मूर्छा चैवोपजायते ।
एवं हृदयशैथिल्यं व्याधयो हृद्भवाश्च ये ॥२१॥

सर्वे समुपजायन्ते कष्टात् कष्टतरं ततः ।
एवमादीनि दुःखानि भुनक्तिं वृद्धमानवः ॥२२॥

नारीणामपि देहेषु शुक्रान्ताः सप्तधातवः ॥
भवन्ति पुरुषस्यैव देहरक्षणहेतवः ॥२३॥

शुक्रोत्पत्तौ तु नारीणां शङ्का नैवोपजायताम् ।
तासां रसादिधात्वन्ते शुक्रं भवति निश्चितम् ॥२४॥

परमुत्पद्यते स्वल्पं पुत्रोत्पत्तौ न तत् क्षमम् ।
तत्तु सारतया तासां बलवृद्ध्यर्थमिष्यते ॥२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्रोदाहरणं स्पष्टमायुर्वेदे प्रकाशितम् ।
प्रत्यक्षदर्शिनः सन्ति ह्यायुर्वेदविदोजनाः ॥२६॥

यदि नार्यौ वृषष्यन्त्यौ संभोगार्थ समुद्यते ।
रजस्वलायामेकस्यां गर्भः समुपजायते ॥२७॥

अस्थिधातुस्तु गर्भस्य पुरुषांशेन जायते ।
इदं युवत्योर्लीलायां जातमस्थि विवर्जितम् ॥२८॥

यदा तन्मांसकललं हस्तेनोत्थाप्य लम्ब्यते ।
तदैव साङ्गप्रत्यङ्ग दृश्यते मनुजाकृति ॥२९॥

अन्यदाह्यमराकारो मांसपिण्डोऽवतिष्ठते ।
एतेन नार्याःशुक्रस्य सत्त्वमेव निदर्श्यते ॥३०॥

परन्तु केवलं पुंसः शुक्रं स्त्रीरजसान्वितम् ।
गर्भाशये विशेत् तस्माज्जायते सक्षमो नरः ॥३१॥

इदमत्र प्रसङ्गेन प्रोक्तं स्त्रीशुक्रवर्णनम् ।
अतः परन्तु प्रकृतो विषयः समुदीर्यते ॥३२॥

ज्ञानी वृद्धस्तु शुद्धात्मा शान्तो दान्त उदारधीः ।
सहते च सुखं दुःखं शान्तया धीरया धिया ॥३३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वदा भावयुक्तेन चेतसाऽनन्यगामिना ।
भजते जगदाधारं परमात्मानमच्युतम् ॥३४॥

समर्पयति सर्वस्वं परमात्मनि भावतः ।
देहादिप्रकृतिं सर्वामात्माऽभिन्नां प्रपश्यति ॥३५॥

रोगश्चेत् सोऽपि श्रुत्युक्तं तप एवेति संस्मरन् ।
विलापयति सर्वं तद् यद् यत्स्यात् स्मृतिगोचरम् ॥३६॥

कृपया परमेशस्य सर्वां विस्मृत्य संसृतिम् ।
समये समये ध्यानं करोति च सुखासनः ॥३७॥

कदाचित् परमेशस्य प्राप्नोति दिव्यदर्शनम् ।
आनन्दसागरे मग्नो न च स्मरति किञ्चन ॥३८॥

जराजीर्णं शरीरं तद् यदा पतति कालतः ।
जीवो गच्छति वैकुण्ठं भूमौ देहोऽवतिष्ठते ॥३९॥

अत्यागिनो बहिर्दृष्टेर्वर्षिष्ठस्याऽस्थिरात्मनः ।
सर्वाण्यहान्यन्तिमानि दुःखदानि भवन्ति हि ॥४०॥

भोगस्योपरमे जीवः संलिप्तवासनावशात् ।
धर्माऽधर्मानुसारेण पुनरेव प्रजायते ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भजते पूर्ववद् भोगं सुखदुःखमयं तु सः ।
एवं संसारचक्रेऽस्मिन् भ्रमते नैव मुच्यते ॥४२॥

नापेक्षितं पुस्त्वमत्र नरनार्योर्द्वयोरपि ।
अवस्थैषैव बोद्धव्या वृद्धयोः परतन्त्रयोः ॥४३॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आतुरसेवा

आङ्पूर्वकाद् अतेर्धातो उरच् प्रत्यययोजनात् ।
सिद्ध्यते ह्यातुरः शब्दो रोगयुक्तस्य बोधकः ॥१॥

कायिका मानसा रोगा भवन्त्यागन्तुका अपि ।
तैर्युक्तो दुःखसंमग्नो नर आतुर उच्यते ॥२॥

येन केनापि रोगेण व्याधितस्याऽतुरात्मनः ।
स्वस्थैः सेवा प्रकर्तव्या मनसा वचसा दृशा ॥३॥

कायेन तु विशेषेण कर्तव्याऽतिविवेकतः ।
वर्धते सर्वदा स्नेहः पारस्परिकसेवया ॥४॥

विषूचिकाऽतिसाराभ्यामाक्रान्ता मानसैरपि ।
तेषां सेवा विशेषेण दुष्करा जायतेतराम् ॥५॥

बाला युवानो जरठा मनुष्या
विभिन्नरोगैर्व्यथिता भवन्ति ।
तत्रापि बाला अतिकोमलाङ्गा
रोगस्य वेगं न हि ते सहन्ते ॥६॥

दुःखञ्च वक्तुं न च शक्नुवन्ति
नाश्नन्ति भैषज्यमपि स्वतस्ते ।
क्रन्दन्ति चात्यन्तमसह्यवेग
व्याधेः प्रकोपादधिकं रुदन्ति ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कष्टा सदा व्याधितबालसेवा
सहिष्णुभिर्धैर्ययुतैर्दयार्द्रैः ।
मात्रादिभिः स्नेहमयैः स्वकीयैः
कार्याविशेषेण तु तस्य सेवा ॥८॥

मलस्य वान्तेरपि शोधनादिना
विषूचिकायामतिकष्टसेवनम् ।
तथा प्रलापैरवधानवर्जनाद्
विसंज्ञया धावनतश्च मानसे ॥९॥

आगन्तुके दुर्घटनादिसंभवै
रङ्गस्य भङ्गैरतुलाऽपदां पदैः ।
गम्भीरदुःखोदधिमग्नदेहिनां
सेवा दुरूहा विविधैश्च कारणैः ॥१०॥

वृद्धो रोगी भवेच्चेत्परिचरणविधौ दुःखदुःखाऽतिदुःखं
शक्तेर्ह्रासादजस्रं सुशिथिलतनुता जायतेऽत्यन्तमेव ।
स्थूलो देहो विचेष्टो यदि भवति तदा स्वापनोत्थापनादौ
भोज्ये पेये च कष्टं भवति हि नितरां रोगिणः सेविनाञ्च ॥११॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कालोपयोगः

श्वः कार्यमद्य कुर्वीत न विलम्बकरो भवेत् ।
श्वः परश्वो न वक्तव्यं तत्स्यात् सिद्धेर्विघातकम् ॥१॥

सहसाऽपि न कर्तव्यं धैर्यं तत्राप्यपेक्षते ।
कालो ददाति साफल्यं नैष्फल्यञ्च ददाति सः ॥२॥

ह्यः कार्यं श्वः प्रकुर्वाणो वञ्च्यते सर्वसिद्धिषु ।
विवेकिभिः सदा कार्या यथाकालं समाः क्रियाः ॥३॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भागवतीयं नवनीतम्

समस्तलोकोद्धरणाय भूमौ व्यासस्वरूपोऽवततार विष्णुः ।
विनिर्ममे भारतमेव पूर्वं ततः पुराणानि नवद्वयं च ॥१॥

तत्रापि भक्तिप्रमुखं पुराणं वेदान्तसारं मननेन गम्यम् ।
मनोऽभिरामं भजतां जनानामभीष्टदं भागवतं चकार ॥२॥

तत्र स्वसूनोरवधूतमूर्ते रात्माभिरामस्य सुवक्तृतायाम् ।
परीक्षितो भक्तवरस्य राज्ञो बोद्धव्यतायामुपदेशमाह ॥३॥

सामान्यरूपेण पुराणलक्ष्म पञ्चस्वरूपेण हि निर्दिदेश ।
अस्मिन् महाभागवते पुराणे मुनिः स एवाह दशस्वरूपम् ॥४॥

सर्गो विसर्गः स्थितिपोषणोति मन्वन्तरेशानुकथाश्च सप्त ।
निरोधमुक्ती तत आश्रयश्च सँयोजने स्युर्दशलक्षणानि ॥५॥

इमानि साक्षान्मुनिनोदितानि सोपानरीत्या दशलक्षणानि ।
विज्ञाय सर्वाणि विविक्तदृष्ट्या संसाधनीयानि विशिष्टभक्त्या ॥६॥

निरोधमुक्त्याऽऽश्रयसंज्ञका वै ब्रह्माऽऽप्तये त्वन्तिमसाधनानि ।
अष्टाङ्गयोगेऽन्तिम योगवर्गे सुधारणाध्यानसमाधिवद् वै ॥७॥

यदा स्वतन्त्रो भगवान् परेशो मायां समादिश्य लयं करोति ।
तदैव जीवोऽपि विलीयतेऽस्मिन्निरोध एषा स्थितिरुच्यते ज्ञैः ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्कन्धे महिष्ठे दशमे विशिष्टे ब्रह्मस्वरूपे भगवत्यनन्ते
श्रीकृष्णाचन्द्रे भजतामजस्रं संवर्ण्यते सन्मनसो निरोधः ॥९॥

अज्ञानतः कल्पितसर्वभावं हित्वा स्वरूपस्थितिरेव मुक्तिः ।
इत्याह मर्त्यार्थमहत्त्वतत्त्वं पाराशरो ज्ञानमहाब्धिचन्द्रः ॥१०॥

एकादशे स्कन्धवरे वरेण्ये मुक्तेः सुखाप्त्यै विविधैः प्रसङ्गैः ।
महामुनिः प्राह कथा अनेकाः श्रुत्वैव मुक्तिर्हि यतो नराणाम् ॥११॥

अनन्तरूपस्य चराचरस्य यतः समुत्पत्तिरभूद् विचित्रा ।
यस्मिँस्तथाऽन्त्ये विलयं प्रयाति स आश्रयो ब्रह्म परावरेशः ॥१२॥

स्वकर्मणां भोगवशादजस्रं संसारचक्रे भ्रमतोऽस्य जन्तोः ।
भाग्येन प्राप्या भगवत्प्रसादात् विश्रान्तिरेषा परमा च शान्तिः ॥१३॥

तस्याश्रयस्यैव विशोधनार्थं प्रोक्तं नवानामिहलक्षणं हि ।
इत्थं महात्मान उदात्तभावाः श्रुतेन चार्थेन च वर्णयन्ति ॥१४॥

स्कन्धेऽन्तिमे द्वादशके वरिष्ठे तमाश्रयं प्राह मुनिर्महात्मा ।
शृण्वन्नगाहेन नृपःपरीक्षित् सद्यो विमुक्तोऽभवदञ्जसैव ॥१५॥

संक्षिप्तमेतद् भगवच्चरित्रं ज्ञानात्मकं भक्तिविरक्तिरम्यम् ॥
ज्ञात्वा सुता भागवतञ्च वीक्ष्य सुगुप्ततत्त्वं हृदि धारयन्तु ॥१६॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कीर्तिः शरीरम्

क) आदिकविर्वाल्मीकिः

अभूत् कश्चिन्मर्त्योऽधमतमसतिर्ब्राह्मणवपुः
किरातानां सङ्गाद् गहनवनचारी समभवत् ।
किरातीमुद्वाह्य प्रचुरतनयानप्यजनयत्
ततो व्याधो जातो बहुलपरिवारार्दितमनाः ॥१॥

धनुर्बाणात् धृत्वा पललहृदयो निर्जनवने
दिवारात्रं भ्राम्यन्नहनदनिशं जीवनिवहान् ।
अनिर्वाहाद् व्याधव्यसनफलतश्चौर्यमकरोद्
अथाऽहार्षीत् क्रूरः पथिकधनमाच्छिद्य तरसा ॥२॥

सदैवैवं कुर्वन्नतिशयनृशंसो हतमति-
रपुष्णात् पापात्माऽपहृतधनतः स्वान् परिजनान् ।
कुटीरादेकस्मिन्नहनि धनमाहर्तुमनसा
वने गच्छन्नासीद् रविसममपश्यद् ऋषिगणम् ॥३॥

तदा तेषां द्रव्यापहरणमभीप्सन्ननुगत-
स्तमायान्तं दृष्ट्वा तपनसदृशास्ते मुनिवराः ।
अवोचन् किं वाञ्छस्यति पतितविप्राधमतम !
स च प्रावोचत् तान् धनहरणमिच्छामि भवताम् ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बुभुक्षाऽऽक्रान्ता मेऽनुदिनभरणीयाः परिजना
अहं तेषां प्राणो मम च त इमे प्राणसदृशाः ।
इमे भर्तव्या मे भृशमशरणाः प्राणपणकै-
र्बिभर्म्येतान्नित्यं विविधविधिनोपार्जितधनैः ॥५॥

अथो प्रोचुस्ते तं सदयहृदयाः सत्यवचना
गृहं गच्छ त्वं तान्निजपरिजनान् प्राणसदृशान् ।
समाश्वास्य स्वस्य प्रणयविधिनैवाऽप्तवचसा
प्रसन्नाँस्तान् कृत्वा स्वहितकरपृच्छां कुरु ततः ॥६॥

मया पापं कृत्वाऽऽहृतधनचये यूयमधुना
रमध्वे सौहार्दादहमहमिकाऽऽभोगनिरताः ।
समांशं तत्रोत्थं दुरितमपि गृह्णीत न च वा
समापृच्छैकैकं रहसि मधुरेणैव वचसा ॥७॥

वयं स्थास्यामोऽत्र त्वमिह तरसाऽगच्छ मनुज !
धनं ते दास्यामः प्रचुरतरमत्यन्तहितकृत् ।
इति प्रोक्तो मूढो झटिति गतवान् स्वाश्रमकुटिं
रहस्येवाऽपृच्छन्निजपरिजनान् प्रेमवशगः ॥८॥

परन्त्वेते सर्वे कृपणहृदयाः स्वार्थनिरता-
न गृह्णीमः पापं वयमभिलषामो धनसुखम् ।
समस्तं तत्पापं स्वकृतफलभुक्त्वात् तव भवेद्
इति प्रोक्तं श्रुत्वा मुनिचरणमागाद् पुनरसौ ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततो जात्या विप्रो मुनिवरकृपालेशवशतः
प्रकाशं सम्प्राप्य स्वकृतदुरितान्यस्मरदसौ ।
धनुर्बाणाँस्त्यक्त्वा मुनिशरणमायात् कृतधृती
रुदन् वारं वारं विनतिमकरोद् भूमिपतितः ॥१०॥

कुकृत्यैराक्रान्तं करुणहृदयाः श्रीमुनिवरा !
दयां कृत्वा हार्दीं निरयगमनादुद्धरत माम् ।
दयार्द्रास्ते सर्वे शरणमरणं नैव भवतु
विचार्यैवं प्रोचुर्भुवि निपतितं ब्राह्मणतनुम् ॥११॥

अहो ! उत्तिष्ठ त्वं तव सुसफलोऽभूद् द्विजभवः
सतां सङ्गः कश्चिद् विकृतविफलो नैव भवति ।
दिशामस्ते सिद्धं मनुवरमनन्तार्थमतुलं
तमाश्वास्यैवं ते चरणपतितं शान्तिमगमन् ॥१२॥

प्रतिज्ञायैवं ते मुनिवरवरेण्याः शरणदा
मनुः को दातव्यो ह्यधमतमविप्राय फलदः ।
विमृश्यैते पश्चात्सुविमलदृशो राममनुतो
मरेति व्यत्यस्तमनुमतिविशिष्टं निरदिशन् ॥१३॥

वसन्नत्रैव त्वं जपमनुमिमं ध्याननिरतो
वयन्नाऽऽयास्यामो यदवधि दृढः सञ्जपमनुम् ।
इति प्रोच्याऽगच्छन् मुदितमनसस्ते मुनिवरा-
असौ तत्राऽसीनः स्थिरमतिरभूद् दीर्घतपसे ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तपः कर्तुः साधोर्गतवति तु काले बहुतिथे
शरीरे वल्मीकोऽभवदतितरां दीप्ततपसः ।
युगानां साहस्रादनु हि पुनरायान् मुनिवरा
अपश्यन् वल्मीके तपसि निरतं तं स्वनयनैः ॥१५॥

ततो निर्गच्छेति प्रणयपरमा दिव्यतपसो
ह्यवोचँस्ते सिद्धं स च निरगमद् दीप्तवपुषा ।
सुजातो वल्मीकादपरजनुराप्तं स्वसुकृता-
दतो वाल्मीकिस्तेऽतिमहितमभून्नामविमलम् ॥१६॥

युगोऽयं सत्याख्यः सुकृततपसैवेष्टफलदः
सतां सङ्गं प्राप्य त्वमपि तपसा सिद्धिमगमः ।
वयं ते सौभाग्यादतुलभगवत्प्रेरणवशा-
दकुर्मेदं कर्म त्वमतिसुकुलीनद्विज इति ॥१७॥

हरेः श्रीरामस्य श्रवणविपरीताक्षरमनुं
जपन् संसिद्धोऽभूरतिपतित विप्रोऽपि तपसा ।
अनन्यः सद्भक्तो हरिचरणमात्रैकशरणा
जपन् शुद्धं रामं क इह न तरेज्जीवनिवहः ॥१८॥

विपर्यस्तान्नाम्नो नियतजपतः सिद्धिमगमो
महत्त्वं नाम्नस्त्वं स्मर विमलदृक् शुद्धहृदयः ।
तपः कृत्वा भूयो रचय विशदं रामचरितं
जनान् सर्वान् भक्तान् भवजलधिपारं नयतु यत् ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निदेशं दत्त्वेमं सपदि गतवन्तो मुनिवरा-
स्ततः सप्तर्षीणां जनहितवचः शुद्धमनसा ।
स्मरन् नद्यास्तीरं समगमदसौ सिद्धमुनिराट्
कुटीरं निर्मायाऽवसदनुपलं रामहृदयः ॥२०॥

समायाताः शिष्या मुनिचरणसेवैकमनसो
भरद्वाजो मुख्योऽभवदतिशयश्रेष्ठगुणवान् ।
कदाचित्तत्राऽऽयाद् भगवदनुकम्पापरवशः
करे धृत्वा वीणां मुनिहितमना नारदमुनिः ॥२१॥

अभूच्छिष्टाचारः कृतयुगसमः स्वच्छविधिना
तपस्वी वाल्मीकिस्तदनु समपृच्छन्मुनिवरम् ।
मुने ! संसारेऽस्मिन् सकलगुणयुक्तो नरवरः
क आस्ते संक्षेपात् कथयतु भवान् मां प्रतिगुरो ! ॥२२॥

मुनेः श्रीवाल्मीकेर्गरिमवच आकर्ण्य मधुरं
मुदा प्राह स्नेहात् सकलभुवनज्ञो मुनिवरः ।
हरिः साक्षादास्ते सत्रिभुवनपतिस्तादृशगुणः
स भावी साकेते दशरथसुतो रामनृपतिः ॥२३॥

स रामो राजर्षिहर्यतिशयितमर्यादितपुमान्
सती नारी देवी जनकतनया तस्य रमणी ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पिता सम्राण्नाम्ना दशरथ इति ख्यातमहिमा
प्रसूः श्रीकौशल्या गुणगणगरिम्णाऽतिमहिता ॥२४॥

विमाता कैकेयी भरतजननी रामहृदया
सुमित्राचाऽन्यास्याद् यमलजननी शान्तिशरणा ।
सुमित्रा पुत्रःस्यात् प्रथमजननो लक्ष्मण इति
द्वितीयः शत्रुघ्नः समरविजयी स्वच्छहृदयः ॥२५॥

क्रमेणैवं सर्वं हरिचरणभक्त्येकविभवो
ह्यवोचत् संक्षेपादतिहितकरं रामचरितम् ।
इति श्रीवाल्मीकिं मधुमयवचः प्रोच्य मुदितो
गतो रामं ध्यायन् पुलकिततनुर्नारदमुनिः ॥२६॥

ततः श्रीवाल्मीकिः प्रमुदितमनाः काव्यकृतये
प्रवृत्तो युक्तात्मा चिरतपसि प्रोत्कण्ठितमनाः ।
कदाचित् स्नानार्थं द्विजवरभरद्वाजसहितो
गतो नद्यां स्नात्वा निजसकलकृत्यं च कृतवान् ॥२७॥

तदा नद्यास्तीरे निधुवनरतात् क्रौञ्चमिथुनात्
पुमांसं भोगस्थं मृगयुरहनद् वज्रहृदयः ।
विलोक्याऽवस्थां तां व्यथित हृदयः साऽश्रुनयनो
रुदन् श्रीवाल्मीकिहर्यशपदनुकम्पापरवशः ॥२८॥

प्रतिष्ठा ते न स्यान्निरवधि निषादाधमतम !
खगं क्रौञ्चं यत्त्वं मिथुनसुखसंसक्तमवधीः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रदायेत्थं शापं सपदि नितरां चञ्चलमना
महर्षिः स्वं शिष्यं स्थिरमतिभरद्वाजमवदत् ॥२९॥

मदीयोऽयं शोकोऽक्षरसमचतुष्पादवलितो
भवेच्छ्लोकश्चाद्यः कविगणगुरुर्नो इतरथा ।
इति प्रोक्तः शिष्यः सहमतिमदात् तेन मुदित-
स्तमेवार्थं ध्यायन् निजकुटिमुपागाद् ऋषिवरः ॥३०॥

तदा ब्रह्माऽकस्मात् पुरत उदितो भाग्यवशतः
स चाऽहर्षिं चिन्ताव्यथितमनसं सौम्यवचसा ।
मुने ! तेऽयं शोको विहिततपसः सत्फलतया
त्वया बद्धः श्लोको भवतु प्रथमः काव्यजगति ॥३१॥

पुनश्चाह ब्रह्मा मम हृदयतः प्रेरणवशात्
तव ब्रह्मन् ! वाणी निरसरदियं सर्वहितकृत् ।
अतः शान्तो दान्तो नियमनिरतो नारदमुखाच्
श्रुतं सारं स्मृत्वा रचयतु भवान् रामचरितम् ॥३२॥

मुने ! साक्षाद् वाणी निवसति भवद् दीप्तहृदये
करोत्वाऽद्यं काव्यं प्रथम इतिहासो भवतु यत् ।
हरेः श्रीरामस्य प्रथयतु यशो दिव्यममलं
तथा तत्पित्रादेः सकलपरिवारस्य च यशः ॥३३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वया प्रोक्ता वाणी क्वचन च मृषा नैव भविता
स्थिरा भूमिर्यावन्निवसति च तावत्तव कृतिः ।
मनुष्योद्धारार्थं प्रचलतुतरां रामवपुषा
प्रदायेमां शिक्षां स्वनिलयमगाल्लोकजनकः ॥३४॥

विधेरन्तर्धानादनु मुनिवरः शान्तहृदयो-
हृदि ध्यायन् रामं मुनिवचनमादृत्य मनसा ।
समारेभे काव्यं श्रुतिसुमधुरं गीतिरुचिरं
समाप्तिं चागात् तद् भुवनजनकाल्लब्धवरतः ॥३५॥

ऋषेः शोकादुत्थं हृदयविशदीकारकममुं
पठन्ति स्म श्लोकं मननिरताश्छात्रनिवहाः ।
तथैवैते नित्यं गुरुरचितरामायणमपि
मुदा गायन्तिस्म श्रुतिसुमधुरं गीतिरुचिरम् ॥३६॥

कृपातो रामस्य प्रथमतमरामायणमिदं
समेषां मर्त्यानां हितकरतया प्रादुरभवत् ।
पठन्त्येतद् भक्ताः कविवरवरेण्याश्च सततं
कृतिर्या वाल्मीकेरगमदमरत्वं तपनवत् ॥३७।

इदं हृद्यं काव्यं प्रथितमभवद् रामवपुषा
ह्यभूदाऽऽद्यं काव्यं श्रुतिजरसरामायणमिदम् ।
समस्ते विश्वस्मिन् प्रथम इतिहासश्च समभू-
दतो मान्यो जातः सकलजगतामादिकविराट् ॥३८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स देहो यातः क्व प्रथमकविता येन रचिता
परं जीवन्नास्तेऽमरतमतनुः काव्यवपुषा ।
कृतिर्वै मर्त्यानां स्थिरतरतनुर्नो नरतनुः
कृतिः संचेयास्यादमरतनुकाङ्क्षैर्नरवरैः ॥३९॥

ख) गोस्वामी रामभक्तस्तुलसीदासः

महात्यागी भक्तप्रवरतुलसीदासमुनिराट्
तपः कुर्वँस्तस्थौ रघुवरपदद्वन्द्वहृदयः ।
तपस्यासन्दीप्ते हृदि रघुपतिः प्रादुरभवत्
वरं दत्त्वा तस्मै त्वरितमगमद् धामनि निजे ॥१॥

वरं लब्ध्वा तुष्टो ज्वलितहृदयो रामकृपया
समेषां शास्त्राणां रसमधुसमाकृष्य मधुरम् ।
समासां भाषाणां मधुरमिलनं गीतिरुचिरं
व्यधाद्भक्त्या रामभ्रमरमहितं ग्रन्थमतुलम् ॥२॥

अपूर्वोऽयं ग्रन्थो ह्यविरलवहद्भक्तिसरसः
समस्तैः सम्मान्योऽभवदनुदिनं भारतभुवि ।
महान्तो विद्वांसोऽप्यतिगरिमगोस्वामिवचनं
प्रमाणीकुर्वन्ति श्रुतिविहितधर्मानुपथगम् ॥३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मनोवाञ्छासिद्ध्यै बहुविधजना रामहृदयाः
स्वशक्त्या सद्भक्त्या प्रतिदिनमुताहो नवदिनैः ।
पठन्तीदं रामायणमविरतं मासविधिना
लभन्ते प्रत्यक्षं फलमभिमतं रामकृपया ॥४॥

सुकीर्त्या सत्कृत्या सरलविधया भक्तिपरया
जनानामुद्धारः समभवदहो ! येन च सता ।
सदेहो निर्यातो वरदतुलसीवत्तु तुलसी-
श्चिरञ्जीवन्नास्ते रविरिव स रामायणवपुः ॥५॥

ग) आदिकविर्भानुभक्तः

समे जाता याताः प्रकृतिनियमाद् भोगवशतः
स जीवन्नेवास्ते सुरुचिरकृतिं यः प्रकुरुते ।
शरीरं यत् कीर्तिर्निवसति सदा दिव्यवपुषा
शरीरं भूतोत्थं विलयमुपयाति ध्रुवमिदम् ॥१ ॥

हृदाध्यायन्नित्यं प्रमुदितमना रामचरणौ
सुभानुर्भूभानू रघुपतिकृपां प्राप्य तपसा ।
अकार्षीन्नेपालीजनहृदयगामादिकवितां
सजीवन्नेवाऽऽस्ते महितमहसा काव्यवपुषा ॥२॥

गृहस्थो विप्रोऽसौ विदितचरशास्त्रार्थगरिमा
सुभक्त्या कर्माणि द्विजकुलविधेयान्यकुरुत ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वभावादायाता व्यवहृतिगता ये च विषयाः
समाधत्तेस्मैतान्विविधनिजचातुर्यबलतः ॥३॥

निबद्धो गार्हस्थ्ये सरलसुजनैर्दुष्करतरे
तथाप्युच्चैर्दृष्टिः सहजसुमनीषान्तरगतः ।
स्वभावोक्त्या रम्यां सकलजनगम्यां सुरुचिरां
करोति स्म स्वच्छां श्रवणरमणीयां सुकविताम् ॥४॥

वसन् काराऽऽगारे सरसरचनां व्यङ्ग्यरुचिरां
तथोत्प्रेक्षागर्भामनिशमकरोद्धैर्यनिरतः ।
विवादे संवादे विजनगमने गल्पसमये
प्रकुर्वन्नेवासीन्मधुरलयतः पद्यरचनाम् ॥५॥

चलन् मार्गे चासौ "गुनुगुनु"रवं स्वान्तसुखदं
प्रकुर्वन् याति स्म स्थिरतरमतिर्मन्थरगतिः ।
कपर्दक्रीडायां समविषमसंख्याऽधिगमने
परं सौगम्यं स्यादिति विरचिता रम्यकविता ॥६॥

वधूनां ग्राम्याणां सरलगृहिणीनामपि मुदे
जनानामन्येषामपि मनसि शान्तेः प्रजननी ।
जनान्पश्यन्नज्ञान् समयसुषमा बोधसुगमा
वधूशिक्षानाम्नी व्यरचि कविता तेन सरला ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विवाहादावन्त्याक्षररसरतैर्ग्राम्ययुवकै-
र्विनम्रैः प्रोक्तोऽसौ युववचनमादृत्य कविराट् ।
ढकाराद्यौ ढान्त्यौ झटिति रचयित्वा प्रमुदितो
ददौ श्लोकौ तेभ्यो मुदितमनसस्तेऽपि चकिताः ॥८॥

सुनीतिस्थानस्थैरधिकृतजनैर्दुष्टहृदयैः
सदैवोक्ते श्वः श्वः श्वरिति नितरां नर्मवचनैः ।
विलम्बे निर्णीतेः प्रभुवरसमीपे विनतिकां
समर्प्य स्वैः पद्यैः सपदि दुरितान्मुक्तिमगमत् ॥९॥

प्रवासेऽपि प्रायो विविधविषये पद्यरचना
अकार्षीद् गार्हस्थ्ये सततमननीया हिततमाः ।
तथैवाऽसौ स्वस्य श्वशुरभवने मातुलगृहे
प्रसङ्गात् संगच्छन्नपि च विदधाति स्म कविताम् ॥१०॥

स्वकीये ग्रामेऽपि भ्रमणसमये कार्यवशतो
गृहे यस्मिन् यातस्तदधिपतिमाश्रित्य कविताम् ।
करोति स्म स्वच्छां मधुरतमसाहित्यवलितां
सुरम्यां तां श्रुत्वा गृहपतिरतीव प्रमुमुदे ॥११॥

कृतिर्भानोर्भानोः प्रसृमरमयूखोपमतया
चुँदीरम्घाग्रामाद् द्रुतगतिमती कालगतितः ।
समस्ते नेपाले रघुपतिपदे भक्तिमभितो
निपाय्याऽऽगादग्रेसरगतिरतीवोत्तरगतिः ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततो जाग्रच्छक्त्या सह गतवती भारतभुवि
विचिन्वन्ती तस्यामतिशयितभक्तान् रघुपतौ ।
गता यस्मिन् यस्मिन् सहनधननैपालकजनाः
स्थितास्तस्मिन् ग्रामे स्थिरतमगतीर्भक्तिमहती ॥१३॥

समस्ते विश्वस्मिन् प्रगतिपथगामिन्यपि वरा
विराजन्ते यत्र प्रचुरतरनैपालकजनाः ।
क्रमात् प्राप्ता सैषाऽऽधुनिकजनताऽऽकर्षणपरा ।
प्रकुर्वन्त्यास्ते श्रीकविवरयशोऽत्यन्तधवलम् ॥१४॥

कविर्भक्तेर्मालामबुधजनहृद्यां सुरुचिरां
द्रवद्भक्तिं सीतासहितरघुनाथस्तुतिपराम् ।
सुभक्तानां कण्ठाभरणमिवधार्यां श्रुतिसुखां
स्वयं भक्तौ मग्नो मनुजसुखशान्त्यै व्यरचयत् ॥१५॥

हृदा ध्यायन् दिव्यं गुरुगुरुतमं शङ्करपदं
विभिन्नार्थं प्रश्नोत्तरगतमहत्त्वं जनहितम् ।
विचार्याऽऽदौ भाषान्तरणमपि नैपालकगिरा
समेषां शिक्षार्थं सरसमकरोद्भावुकधिया ॥१६॥

स्वकीयैः पुण्यौघैर्विशदकुलजातो द्विजवरो
मनीषावैशिष्ट्यात् समजनि स आदिः कविवरः ।
विलीनो देहोऽसावितरजडवद् भूतजनितः
परं जीवन्नास्ते स्वकृतकवितादिव्यवपुषा ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथा श्रीवाल्मीकेः कवनविषये क्रौञ्चवधकृ-
न्निषादो व्याधो वै गुरुरभवदत्यन्तहितकृत् ।
यथा वा सद्भक्तप्रवरतुलसीसिद्धिजनने
स्वकीया पत्न्येवाऽभवदतितरां त्यागजननी ॥१८॥

कवेर्भानोः कर्लुङ्नदनिकटवर्ती कृषिरतः
कृषेरायात् कूपं स्वयमखनयद् धर्मनिरतः ।
द्विजोऽसौ प्रोत्साहप्रदगुरुरभूद् गोलकजनि-
स्ततः सोत्साहोऽसौ व्यरचयत दिव्याः सुकविताः ॥१९॥

प्रमाणीकुर्वन्ति बहुतरजना एतदखिलं
न मन्यन्ते केचिद् विविधविधिनाऽलोचनपराः ।
न दृष्टो यः सस्याच्छ्रवणगतविश्वासविषयः
प्रमाणेस्वाप्तानां वचनमपि मान्यं हि भवति ॥२०॥

स एवाऽप्तः प्रोक्तो वदति सततं तथ्यवचनं
सदा बुद्धिः शुद्धा भवति नियमेषु स्थितवतः ।
न चैतस्मिन् रागो न भवति तथा द्वेषपरदृक्
तदुक्ता सत्या वाक्क्वचिदपि मृषा नैव भवति ॥२१॥

मृतो वृद्धो वाणी प्रसरति सदाऽजस्रगतितः
सदा वाणीं नित्यामभिदधति तद्विज्ञविवुधाः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमाणं वाणीनां समहितकृतां नित्यविषये
पुराणाढ्या वेदा अखिलगुरवः सन्ति पुरतः ॥२२॥

अनेकाऽनेकेषां मनुजजनुषां पुण्यनिचयात्
प्रसिद्धे संपूज्ये द्विजवरकुले संप्रजननात् ।
तथा काश्यां पैतामहचरणसेवाऽभिरतिजात्
सुपुण्यात्सत्साङ्गादपि निशितबुद्धिः समजनि ॥२३॥

अतः प्रागेवाऽऽसीद् रुचिरकविताशक्तिरतुला
सदैवाऽसीत्तस्मिन् परमकरुणा श्रीरघुपतेः ।
अतः कुर्वन्नासीत् विविधसमयाऽपेक्ष्यकविताः
प्रसङ्गात् प्रोत्साहं ह्यलभत कविर्गोलकमुखात् ॥२३॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संयमः

सीमन्ते दृश्यते नार्याः सिन्दूरं विधिनाऽर्पितम् ।
तस्यां कुभावनां कृत्वा विनश्यति स्वयं नरः ॥१॥

सिन्दूररहितायां च दुर्बुद्ध्याऽऽसक्तमानसाः ।
पदे पदे कार्यसिद्धौ तेऽपि भ्रश्यन्त्यसद्ग्रहात् ॥२॥

प्रभावादेव प्रकृतेः स्वतो विशति मानसम् ।
निरुध्य तत् प्रयत्नेन स्थेयं स्वात्मनि सर्वदा ॥३॥

दृष्ट्वा परपुरुषं या भवति लुब्धा कुभावनया नारी ।
इहामुत्रापि विनष्टा सैव विलपति पश्चात्तप्ता ॥४॥

अतः पुंसा नार्या च प्रसमीक्ष्य स्वकीय कुलगरिमाणम् ।
बुद्ध्यैव नियम्यमनः स्थेयं स्वपुरुषे स्वपत्न्यां च ॥५॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमादः

विबुधैरितरैर्जनैरपि सततं शुद्धधिया पुरस्कृतम् ।
गुणगौरवधामनाम तत्किमभूत् क्षुद्रधिया तिरस्कृतम् ॥१॥

स्वयमेव गुरुर्गरीयसामितिमत्वैव विहाय सौहृदम् ।
इतरान् गुणगौरवान्वितानविवेकादभिभावयन्ति च ॥२॥

अभिमानधना बुधा अपि खलु नश्यन्ति पतन्ति गौरवात् ।
निरहं ममतास्तु ते चिरादधितिष्ठन्ति पदं प्रतिष्ठितम् ॥३॥

अधिकारवता सता सदाऽम्बुधिना पर्वतपुत्रिकास्विव ।
गुणवत्सु विवेकशालिषु न विधेया हि विभेदकल्पना ॥४॥

उपकारसमं हितं सुखं न च पुण्यं वरिवर्ति किञ्चन ।
उपकारकृता कृतं हि यत् सकलं तत्सफलाय कल्पते ॥५॥

अपकारपरेऽपि दुर्जने हितकृद् यः स हि साधुरुच्यते ।
उपकारिषु साधुरस्ति यो न स साधुः सुजनैरुदीर्यते ॥६॥

परवञ्चयितुं कृताः क्रिया रुचिरा दर्शनतो भवेदपि ।
असतां हि सदाऽसुखायतिर्न शुभा सा तु भवेद् विडम्बना ॥७॥

गुणवानपि शीलवानपि फलसिद्धौ परवानयं जनः ।
अत एव विवेकशालिना फलसिद्धिः प्रभवे समर्प्यते ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

असता मनसा बहिश्चरन् विविधानेव फलानि संस्मरन् ।
बहुशो विहितानि चेदपि न च कर्माणि फलन्ति वस्तुतः ॥९॥

विधिपूर्वकमादरेण यद् विहितं कर्म शुभं सता हृदा ।
न च तत्र विकल्पकल्पना फलसिद्धिः स्वत एव सर्वथा ॥१०॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आदर्शमयं वृक्षजीवनम्

पुष्पैःफलैर्दारुभिश्च समिद्‌भिः पत्रपल्लवैः'।
वल्कलैः सारगर्भैश्च निर्यासैर्मधुभी रसैः ॥१॥

वृष्टेराकर्षणैश्चैव वायूनां परिशोधनैः ।
छाययाच्छत्रवद्‌वर्षवातातपनुदा तथा ॥२॥

प्राणवृत्यैव सर्वेषां कुर्वन्तः परमं हितम् ।
धृतिमन्तः क्षमासाराः सोपहाराः सदैव हि ॥३॥

सर्वसंहारुहाः सर्वं सहमाना दृढव्रताः ।
महर्षिवत्तपस्यन्तो वसन्तो विजने वने ॥४॥

आनन्दयन्तो भूतानि सर्वस्वैरुपकारकैः ।
वृक्षा जीवन्ति सुचिरं परार्थैकमहाव्रताः ॥५॥

मलं जलं समश्नन्तो वितरन्तोऽमलं फलम् ।
दिशन्ति शिक्षां दीक्षां च जनेभ्यो मौनभाषया ॥६॥

स्थानभेदं न कुर्वन्ति मले मूत्रे जले स्थले ।
यत्र कुत्रापि रोहन्ति परोपकृतये सदा ॥८॥

उपकारव्रतास्ते हि प्राणिनां हितकाम्यया ।
पवनैः सुहितैः स्वच्छैः स्वशक्त्या परिशोधितैः ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयच्छन्ति महात्मानो विषमादाय वै सुधाम् ।
दुःखैर्विघ्नैर्हता ये तान्निरुत्साहान्निरुद्यमान् ॥१०॥

उत्साहयन्ति छेदेऽपि पुना रोहन्त एव ते ।
वार्तालापं न जानन्ति कार्यं कुर्वन्ति सत्फलम् ॥११॥

स्थावराणामपि सतामनन्तगुणशालिनाम् ।
उपकारकतामेषां सङ्गृह्य विपुलाशयाः ॥१२॥

विशिष्टचेतनावन्तः सन्तः परहिताय वै ।
ये जीवन्ति जनास्तेषां जीवनं वृक्षजीवनम् ॥१३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आपातनिपातनिरोधः

स्मररसरसिकानां योषितां रूपिणीनां
स्तनवदननितम्बा वेषभूषादिकञ्च ।
प्रकृतिनिजमहिम्ना भेदभावं विनैव
नरनयनमनांसि क्षिप्रमाकर्षयन्ति ॥१॥

अविदितनरतत्त्वा भोगमात्रैकलक्ष्या
अहितहितविमूढाः कामपूर्तेरतृप्ताः ।
अजवृषभसमाः स्वं मृत्युमप्यस्मरन्तो
मृतिमयमधुकुण्डे मक्षिकावत् पतन्ति ॥२॥

अनुचितफललाभात्सर्वदा निःश्वसन्तो
निखिलमपि धनं स्वं लोकभीत्याऽर्पयन्ति ।
सकलजनसमाजे दोषमाच्छादयन्तो-
ह्यनुतपनसुतप्ताः प्राणमप्युत्सृजन्ति ॥३॥

कतिचन बत नार्यो वीक्ष्य रम्यं पुमासं
निजवशमुपनेतुं हावभावैर्यतन्ते ।
मदनदहनदग्धा नेत्रयुग्मं निमील्य
क्षणिकसुखविमुग्धास्तं नरं पातयन्ति ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वदुरितपरिपाकाद् गर्भमासाद्य पश्चात्
सकलजनसमूहैर्धिक्कृताः पापदग्धाः ।
अमृतमिव विषं या मन्यमाना जघन्याः
स्वकृतदुरितभोगान्मूर्च्छितास्ता भवन्ति ॥५॥

ऋषिमुनिवरदृष्टो धर्मसेतुर्न चेत् स्याद्
भुवि नृषु पशुधर्मो वार्यमाणः कथं स्यात् ।
परिणयनविधानं केन कस्याः कदा स्यात्
सहजनिनरनारीसंगमः किन्नु न स्यात् ॥६॥

अपि च मनुजमात्रे तुच्छसौहार्दबद्धो
जननिवहविरुद्धः सङ्गमः केन वार्यः ।
इति सुविमलदृष्ट्याऽऽलोकनीयं मनुष्यै-
र्नहि तु जनसमाजः सर्वथा स्याद् विनष्टः ॥७॥

रसपरवशमर्त्या दूरदृष्ट्या विहीनाः
स्वमृतिकरदुरन्तं नैव किंचित्समीक्ष्य ।
अहितकरमपथ्यं वस्तुजातं विलोक्य
वडिशनिहितमांसं मत्स्यवद्भक्षयन्ति ॥८॥

मनुजजनिरहस्यं भस्मसात्कृत्य मूढाः
श्रवणजसुखसक्ता मार्गमार्गं लभन्ते ।
नयनजसुखमुग्धाः सत्यतत्त्वाऽनभिज्ञाः
पतग इव सुदीप्ते दीपके यान्ति मृत्युम् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गरलमयपरस्वं वीक्ष्य पीयूषबुद्ध्या
तरलतरमनस्को मानवो नीचतुच्छः ।
कपटमधुरवाचं स्वार्थपूर्तौ प्रयोज्य
ह्यपहरति परस्वं दूरदृष्टिं विसृज्य ॥१०॥

इति गहनरहस्यं सूक्ष्मदृष्ट्या समीक्ष्य
सततविशदबुद्ध्या स्वं मनः सन्निगृह्य ।
सुकृतपरमलक्ष्याः स्वस्वकर्तव्यनिष्ठा-
चरमतमपुमर्थप्राप्तये संयतध्वम् ॥११॥

* * *

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal